कविता मञ्जरी

ब्रह्मधाम, हस्तिशालं, पुरी (ओडिशा)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कवितामञ्जरी

पण्डितश्रीलक्ष्मीधरद्विवेदी
साहित्य–धर्मशास्त्र–पुराणाचार्य–वेदान्तशास्त्री

ब्रह्मधाम, हस्तिशालं, पुरी (ओडिशा)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कवितामञ्जरी

रचकः
पण्डितश्रीलक्ष्मीधरद्विवेदी
साहित्य-धर्मशास्त्र-पुराणाचार्य-वेदान्तशास्त्री
बलाङ्गिरस्थविद्याभूषणसंस्कृतमहाविद्यालयस्य वरिष्ठप्राध्यापकचरः

प्रकाशकम्
ब्रह्मधाम, हस्तिशालं, पुरी (ओडिशा)
चलदूरभाषः - ९४३९४८७९४९

प्रकाशनकालः
१९३७तम शकाब्दीया (२०१६ खृ.) श्रावणपूर्णिमा

मुद्रणपरिमाणम्- १०००

वर्णविन्यासकः
श्रीदेवव्रतरथः, पुरी

मुद्रकः
एच्.पी. प्रिण्टर्स, क्लार्करोड, पुरी

मूल्यम्- ६०/- (षष्टी रूप्यकाणि)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वर्गतायै सहधर्मचारिण्यै सौभाग्यवत्यै श्रीमत्यै अन्नपूर्णादेव्यै

अयि,

जीवने तुभ्यं किमपि सुखं दातुं नाशकम् । तदानीन्तनी स्थितिस्तथैवासीत् । त्वं तु मम रिक्तपात्रं दानेन पूर्णमकार्षीः । पुत्रत्रयेण कन्यामदाः । मत्सौख्याय तवावदानमविस्मरणीयम् । हा, मद्दुर्दैवं चिरं ते सान्निध्यसुखाय ऐर्ष्यत् । मत्तस्त्वां प्रसह्याग्रहीत् । इदानीं ते स्मृतिर्मे सहचरी। यत्र कुत्रापि वर्तमाना सम्प्रति मया प्रत्तां कृतिमिमां सादरमङ्गीकुरु ।

त्यक्त्वा गतायां त्वयि मर्त्यलोकं
स्वर्धामवामाङ्गि वियोगखिन्नः ।
स्मृतौ तवेमां विनिवेदयामि
प्रीत्योररीकृत्य कृतार्थयेर्माम् ।।

रसैर्नानाविधैर्युक्तां कवितामञ्जरीमिमाम् ।
ददामि प्रीतये तुभ्यं गृहाण प्रणयान्मम ।।


इति
त्वदीयो हतभाग्यः
पतिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

SHRI JAGANNATH SANSKRIT VISHVAVIDYALAYA
SHRI VIHAR, PURI - 752003, ODISHA

Prof. Gangadhar Panda

Vice-chancellor



Ph. (06752) 251663 (Off.)
251640 (Res.)
250484 (Fax)
visit : www.sjsv.nic.in
Email : sanskrit.university@yahoo.com

शिवसङ्कल्पः

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।।

इत्यलङ्कारशास्त्रवचनप्रामाण्यान्मिथ्याज्ञानजन्यसंसारवन्धनाद्विमुक्तये काव्यस्य हेतुता सहृदयषण्डानुभवसिद्धा । आपीतविद्यावारांनिधिभिर्दिग्दिगन्तविकीर्ण-कीर्तिभिः कविभिर्विरचितेषु काव्येषु लोकोत्तराह्लादजनकज्ञानगोचरता रञ्जयति सहृदयचेतांसि । विचित्रसरसकवितासर्गे अवाङ्मानसगोचरां विदग्धतामादधतीं गुणनिधीनां प्रेक्षापूर्वकारिणां शिष्टाचारसम्पन्नानामाचार्यप्रवरलक्ष्मीधरद्विवेदि-महाभागानां कवितामञ्जरीं पठन्नहममन्दमानन्दमनुभवामि । कवितामञ्जर्यां 'पुरीप्रशस्तिः' ह्लादमयी धृतकैवल्यचरणारविन्दस्य जगदेकनाथस्य श्रीमज्जगन्नाथस्य कीर्त्तिवैभवं प्रकाशयन्ती अन्वर्थसंज्ञामावहति ।

पुरीं परित्यज्य मुधा किमर्थं प्रयासि काशीमथवा प्रयागम् ।
विराजते यत्र जगन्निवासः स्वयं परात्मा जगदीशनाम्ना ।।१
सरित्पतिर्यत्र तरङ्गहस्तैर्मुक्ताकलापं वितरत्यनल्पम् ।
गम्भीरघोषैः स्तवमेतदीयं गायत्यजस्रं निवसात्र गाढम् ।।२

इत्यादिरसात्मकच्छन्दोमयकवितया हृदयग्राहिण्या तत्त्वगर्भया महाकवीनां द्विवेदिमहोदयानां श्रीजगदीशाशीर्वादसम्पन्ननवोन्मेषशालिप्रतिभा निरतिशया इत्यत्र निरङ्कुशा धीराणामात्मप्रतीतिः । कवितामञ्जर्या विज्ञानपयोनिधिगर्भे लसन्तीषु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कवितासु वाराणसीवर्णना–भुवनेश्वर–शिवभापितप्रभृतयः कविता एतेषां कवीनां प्रतिभायाः परिपाकेन भापामाधुर्येण भावसौष्ठवेन चमत्कृतिं प्रकाशयन्ति । 'गृह्णीत यत् साधु' इति छन्दोवद्धकवितया विचक्षणा एते कवयः शास्त्रालोचना निरस्तदुस्तर्ककलङ्कमार्गाः स्वकीयां सुधामयीं नम्रतामहङ्कारविविक्तताञ्च प्रकाशयन्तो 'नमन्ति फलिनो वृक्षाः' इति वचनं व्यवहारे परिपोषयन्ति तत्र–

अयं प्रगल्भः किमु जल्पतीति भोर्नैवं मतिर्मे वचने विधीयताम् ।
शुकस्य बालस्य वचोऽपि गृह्यते विचक्षणैस्तद्यदि वै सुसङ्गतम् ।।१
हंसो यथापास्य जलं क्षीरं पिवेत्कुशाग्रवुद्ध्या प्रविविच्य पण्डितः ।
गृह्णीत यत्साधु तदेव केवलं कल्याणकृच्चात्मन एव सर्वथा ।।३६

इत्यादिपद्यानि प्रमाणानि । अत्र प्रायेण कविता उपमामाधुर्येण वचोविन्यास–वैचित्र्येण भावगाम्भीर्येण संस्कृतमन्दाकनीं कुर्वन्ति समृद्धाम् । एतादृशस्य वर्णनाचातुरीवदनस्य अमृतमयतत्त्वगर्भस्य ग्रन्थस्य प्रचारे प्रसारे व्यापकतां नीलाद्रिचूडामणिं याचेऽहम् ।

कवितामञ्जरीकारा द्विवेदिवंशसम्भवाः ।
लक्ष्मीधराभिधप्राज्ञा भवन्तु दीर्घजीविनः ।।
कवितामञ्जरी तेषां पीयूषवर्षिणी परा ।
जगन्नाथकृपालम्वा भातु चन्द्रगुणा चिरम् ।।

इति गुणमुग्धः

प्रो. गङ्गाधरपण्डा
कुलपतिः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी ।
दिनाङ्कः – २२.०२.२०१६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रो. सूर्यमणिरथः
साहित्यविभागमुख्यः
श्रीसदाशिवपरिसरः, पुरी-१

अभिमतम्

'पण्डितश्रीलक्ष्मीधरद्विवेदी' इति नाम उत्कले संस्कृतविदुषां मध्ये अतिपरिचितम् । लब्धप्रतिष्ठेभ्यः गुरुभ्यः पारम्परिकशैल्या उत्कले संस्कृतम् अधीत्य द्विवेदिमहोदयः विशिष्टसंस्कृतविद्वान् भवति । वेदधर्मशास्त्रसाहित्यादिषु अप्रतिहतगतिरयं उत्कले बलाङ्गीरनगरे सर्वकारीये विद्याभूषणसंस्कृतमहाविद्यालये अध्यापना-मारब्धवान् । पित्रोः सुयोग्यपुत्ररूपेण गुरूणाम् आदर्शशिष्यरूपेण तत्सकाशात् लब्धाशिषा अनेन अध्यापनाजीवने महती ख्यातिरर्जिता ।

सेवानिवृत्त्यनन्तरं समग्रभारतवर्षम् अटित्वा भारतस्य लोकानां चरितं तीर्थस्थानानां महत्त्वम् अवस्थां च साक्षात् अनुभवितुं स्व-उपार्जितधनव्ययेनायं पर्यटकः सञ्जातः । भारतभ्रमणकाले यस्मिन् स्थाने यदनुभूतं तत्संस्कृतकाव्यमाध्यमेन अस्मिन् ग्रन्थे दत्तरूपं वर्त्तते । न केवलम् एतद् भारतस्य विशिष्टजननायकस्य सुभाषचन्द्रवोषस्य विषये, मठमन्दिरेषु विद्यमानानां मूर्खाणां जनवञ्चकानां मठाधीशानां विषये चातिशयोक्तिरहिता वर्णना अस्मिन् काव्यसंग्रहे वर्तते ।

वाराणसीवर्णनम्, कलाटीवर्णनम्, भुवनेश्वरवर्णनम्, पुरीनगरे दुर्वृत्त-चरित्रचित्रणञ्चेत्यादि कवितामाध्यमेन द्विवेदिमहोदयः स्फुटयति ।

अहं सर्वासां कवितानां पठनम् आमूलचूलं कृतवान् । कवितापठनेन तत्तद्विषये एकं जीवद्रूपं मम मानसे अविकलम् आविर्भूतम् । तत्तत्स्थानमगत्वापि अहं तत्तत्स्थानानां चित्रं साक्षादनुभूतवान् ।

काव्यसंग्रहस्य नाम 'कवितामञ्जरी' । अस्याः कवितामञ्जर्याः साहित्यिकदृष्ट्या विचारः क्रियेत चेत् तर्हि काव्येषु वहुलतया वै, हि, द्राक्, अद्धा इत्यादीनां प्रयोगात् स्वारस्यं किञ्चित् ह्रासत्वं गच्छतीति तर्कयामि । एतद्भिन्नम् अन्यत्सर्वं सुसमञ्जसं विभाति । अधुना शुद्धसंस्कृतेन केचन संस्कृतविद्वांसः वक्तुमपि न पारयन्ति । अस्यां परिस्थितौ द्विवेदिमहोदयः संस्कृतेन छन्दोवद्धं काव्यं यत् रचयति तत्सर्वथा श्लाघ्यम् । संस्कृतकविषु द्विवेदिमहोदयस्य स्थानं वर्ततम् । अहमेतस्य काव्यसंग्रहस्य सर्वादृतत्वं कामये । इति ।

सूर्यमणिरथः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रस्तावना

यस्य प्रसादमिच्छन्ति वासवाद्या दिवौकसः ।
तमनन्तं प्रपद्येऽहं जगन्नाथं जगद्गुरुम् ।।

काव्यसामान्यलक्षणविषये भामहादीनामालङ्कारिकाणां मतिवैचित्र्यात्सत्स्वपि वैविध्येषु सहृदयहृदयावर्जकं वाक्यमेव काव्यमिति नात्र कस्यापि विप्रतिपत्तिः । 'कवृ वर्णने' इति धातोः कवयतीति कविरिति औणादिकात् कविशव्दात् कृत्यर्थे ष्यञ्–प्रत्ययं कृत्वा 'कविकृतिरेव' काव्यमिति विज्ञा आमनन्ति । प्राचीनैरालङ्कारिकैः काव्यस्य विशेषलक्षणेऽकृतेऽपि विश्वनाथेनोक्तम्–

भाषाविभाषानियमात्काव्यं सर्गसमुज्झितम् ।
एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्जितम् । ।इति ।

(सा.द. ६/३२८)

काव्यार्थे कवितापदप्रयोगोऽपि प्राचीनः । यतः 'कविता वनिता चैव सरसा स्वयमागते'त्यादीनि पद्यानि प्रमाणम् । विभिन्नसमयेषु भिन्नभिन्नविषयानवलम्ब्य एताः कविताः बह्वोः प्राग्रचिता गाण्डीव–स्रग्धरापत्रिकयोः प्रकाशिताश्च । सम्प्रति ताः संगृह्य 'कवितामञ्जरी'ति नाम्ना प्रकाश्यन्ते । मञ्जर्यां यथा वहूनि पुष्पाणि भवन्ति, अत्र तथा काव्यानि सन्तीति सूचनाय । यत्र विश्वविश्रुतकीर्तिश्चूडान्तप्रतिभाविकासः कविताकामिनीविलासः कालिदासो वक्ति– 'मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यता'मिति ; तत्र का कथा मादृशो मितमतेरज्ञप्रायस्य । सुरसरस्वतीसिसेविषेरितः 'अथावाच्यः सर्वः स्वमतिपरिणामावधिगृणन्नि'ति पुष्पदन्तोक्त्या 'खे द्योतमानास्वपि तारकासु खद्योतवृन्दानि न किं स्फुरन्ति' इति स्मृत्या च प्रोत्साहितोऽस्यां दिशि । मम कृतिरियं कियत्साफल्यं भजते विषये तस्मिन् निर्मत्सराः गुणैकपक्षपातिनो विद्वांसो विमर्क्ष्यन्ति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

असमीक्ष्य जडो विगर्हणं कुरुते चेन्नहि दुःखकारणम् ।
प्रविदन्ति जना निसर्गतः कपिवृत्तिः खलु दन्तदर्शनम् ।।१
परिशील्य बुधस्य निन्दनं ननु तन्मे नहि खेदकृद्भवेत् ।
अनलेन भवेत्सुदीप्तिमत्कनकं वस्नविवृद्धिमत्परम् ।।२

अन्ते श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिना आचार्य (प्रोफेसर) श्रीगङ्गाधरपण्डामहोदयेन बहुमूल्यस्वसम्मतिदानेन, वयसा कनिष्ठेनाऽपि गुणैः श्रेष्ठेन सतीर्थेनानुजकल्पेन राष्ट्रियसंस्कृतसंस्थानस्य पुरीस्थश्रीसदाशिवपरिसरे साहित्यविभागे आचार्य (प्रोफेसर)पदं विभूषयतायुष्मता संशोधयता श्रीमता सूर्यमणिरथेन सपरिश्रमं वीक्ष्य प्रमादप्रदर्शनपुरःसरं परिवर्तयितुं परामर्शं ददता बहुत्र संशोधयता च भृशमुपकृतोऽस्मीति तयोरायुरारोग्यमैश्वर्यमितोऽपि समेधतामिति जगदीश्वरे प्रार्थये ।

वर्णविन्यासकेन श्रीमता देवव्रतरथेनापि सङ्गणकयन्त्रटङ्कणकर्मणि मत्कृते भूयान् श्रमः कृत इति तस्मै आशीः प्रदीयते । इति ।

विदुषां विधेयः
लक्ष्मीधरद्विवेदी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूचीपत्रम्

विषयाः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रार्थना

चित्ते मदीये करुणाम्बुराशे माभूत्कदाचिद्विषयाभिलाषः ।
रूपं त्वदीयं स्फुरतादजस्रं वक्त्रे च नामाखिलदुःखहारिन् ।।१
सङ्गोऽस्तु सद्भिर्मम कर्णयुग्मे विशन्तु वाचः सततं हि भद्राः ।
तव प्रसादान्मम दृष्टिमार्गे दृश्यानि भव्यानि पतन्त्वजस्रम् ।।२
परोपकाराय सदा प्रवृत्तिर्जागर्तु मे चेतसि दीनबन्धो ।
नान्यापकारोऽस्तु मया कदाचित्समाहितात्माहमसानि शश्वत् ।।३

—*—

पुरीप्रशस्तिः

पुरीं परित्यज्य मुधा[1] किमर्थं प्रयासि काशीमथवा प्रयागम् ।
विराजते यत्र जगन्निवासः स्वयं परात्मा जगदीशनाम्ना ।।१
सरित्पतिर्यत्र तरङ्गहस्तैर्मुक्ताकलापं वितरत्यनल्पम् ।
गम्भीरघोषैः स्तवमेतदीयं गायत्यजस्रं निवसात्र गाढम् ।।२
यस्याः श्मशानं वपुषैव साकं पापानि दग्ध्वा प्रहिणोति [2]नाकम् ।
लोकानशेषानिति कारणेन स्वर्गस्य तद्द्वार[3]मिति ब्रुवन्ति ।।३
यन्मन्दिराग्रस्थितवस्त्रवल्ली[4]मालोक्य दूरादपि भक्तवर्गः ।
नतेन मूर्द्ध्ना मुकुलीकृतं स्वं [5]शयद्वयं योजयतेऽतिभक्त्या ।।४
प्रासादमूले ह्यवतिष्ठमानो वीक्षेत चेदूर्ध्वमुखः नरः सन् ।
चूडां तदीयां निजशीर्षदेशादुष्णीषबन्धः प्रपतेद्धरण्याम् ।।५
सर्वातिशायि प्रसमीक्ष्य लोकाः समुन्नतं यद्धरणौ वदन्ति ।
अन्वर्थनामास्ति हि [6]बड्गमेतद्विशेषणं यत्खलुमन्दिरस्य ।।६
धर्मार्थयोर्यत्फलमामनन्ति त्रिवर्गमध्ये बुधवृन्दमुख्याः ।
तस्यैव कामस्य कलासु सक्ता उत्कीर्णगात्राः प्रतिमा लसन्ति ।।७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वात्स्यायनेन ग्रथिते हि शास्त्रे वन्धा रतेर्ये गदिताः समस्ताः ।
शिल्पिव्रजस्तान् प्रतिमाभिराभिः प्रादर्शयत्स्वीयकलासु दाक्ष्यम् ।।८
यन्मन्दिरस्याजिरसंस्थितानापणानुपेत्याखिलभक्तलोकाः ।
महाप्रसादं महतादरेणास्वाद्यातिमोदं समवाप्नुवन्ति ।।९
नानाविधव्यञ्जनयुक्तमन्नं पूपांश्च भुक्त्वा विविधप्रकारान् ।
मुधा सुधास्वादनदृप्तदेवा इति प्रहर्षेण गिरं गिरन्ते ।।१०
यद्द्वारदेशे परिहृत्य काशीं स विश्वनाथः प्रविभाति शश्वत् ।
देव्यन्नपूर्णापि च भद्रकालीरूपेण संराजत एत्य तस्मात् ।।११
पतिं सपत्नीं च गतौ समीक्ष्य प्रवाहवेगं तु विसृज्य गङ्गा ।
सरोमिषेणास्त[९] इहानिशं किं यां श्वेतगङ्गां प्रवदन्ति लोकाः ।।१२
मार्कण्डनाम्ना मुनिपुङ्गवेन तपःसुतप्तं सुचिरं हि यत्र ।
सैषा पुरी तत्र सरः प्रमाणं स्वयं प्रसिद्धं तदभिख्यया[८] यत् ।।१३
लोलालकाः शीतलवातयोगद्विधूनितां [९]झावुकशाखिशाखाम् ।
वेलावनालीं समवेक्ष्य मुग्धा जल्पन्त्यनल्पं मुदितान्तरङ्गाः ।।१४
उह्यिष्यमाणा[१०] अपि काश्चनाश्च प्रत्यग्रमूढाः[११] प्रणयातिरेकात् ।
प्रियैः समं चाययितुं स्वचित्रं वदन्ति चित्रग्रहणे सुदक्षान् ।।१५
आराद्विभात्यब्धितटेऽतिरम्यः श्रियो विहारो विबुधैश्च पूर्णः ।
अधीत्य शास्त्राणि हि धन्यधन्याश्छात्रा भवन्तीह समाजमध्ये ।।१६
आचार्यवर्येण हि शङ्करेणानुभूय सम्यक् सुमहाप्रभावम् ।
संस्थापितः स्वाश्रम एव पूर्वं गोवर्द्धनं पीठमिहामनन्ति ।।१७
शीलामयीं मूर्तिमतीवरम्यां गोवर्द्धनस्यापि सदाशिवस्य ।
अर्द्धाम्बिकेशं जनतोपकृत्यै प्रत्यष्ठिपत्सोऽत्र च भव्यलिङ्गम् ।।१८
शिष्यप्रधानं स सनन्दनाख्यं न्यवेशयत्क्षेत्रवरे विचिन्त्य ।
यं पद्मपादं प्रवदन्ति लोका भक्तिर्गुरौ यस्य च सुप्रसिद्धा ।।१९
यं वैदिकं शाश्वतधर्ममाहुस्तं रक्षितुं ते महताश्रमेण ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुर्वन्ति कर्माणि तदीयमार्गानुगामिनो येऽत्र मठाधिपाश्च ।।२०
रामानुजाद्यैरखिलैः प्रसिद्धैः सद्भिः समेत्यात्र मठाः स्वकीयाः ।
संस्थापिता ये प्रविभान्त्यजस्रं प्रचारयन्तो निजधर्ममार्गान् ।।२१
यो वैष्णवानां धुरि कीर्त्तनीयोऽवन्तीनरेशः परिहाय राज्यम् ।
स्वप्नेऽवलोक्यात्र समेत्य तूर्णं प्रापाब्धिकूले किल दिव्यदारुम् ।।२२
चिन्ताकुलं तं नृपतिं विदित्वा स्वप्ने स्वरूपेण कृपानिधानः ।
प्रोवाच राजंस्तव चिन्तयालं निर्मामि मूर्त्तिं मयि विश्वसीहि ।।२३
उपेत्य भूपं प्रग एव वृद्धः कश्चिज्जगादास्मि नरेश शिल्पी ।
मूर्तिं विधास्ये मम संविदेषा न कोऽपि पश्येन्मम कारुकर्म ।।२४
कपाटबद्धस्य गृहस्य मध्येऽभवज्जराङ्गः सह दारुभिः सः ।
निर्माणयोग्यैर्बहुसाधनैश्च खाद्यैः पदार्थैर्विविधैरुपेतः ।।२५
चन्द्राक्षिघस्रेषु[12] गतेषु राजन्नुद्घाटनीयं गृहमेतदेव ।
पूर्वं ततो नेति निवेद्य सम्यग् विवेश पश्चात्स गृहान्तराले ।।२६
सप्ताह एकः क्रमशो व्यतीतः शब्दो न कश्चिच्छ्रुतिमाजगाम ।
वृद्धो व्यसुः[13] स्यादिति शङ्कमानो द्रुतं कपाटं नृप उन्मुमोच ।।२७
व्यङ्गानि[14] रूपाणि नृपो विलोक्य बभूव गाढं व्यथितान्तरात्मा ।
शुश्राव वाणीं गगनोच्चरन्तीं रूपं ममेदं खलु चात्र पूज्यम् ।।२८
जगत्स्वरूपो जगदस्ति यस्मिन्नाथोऽपि यो वै जगतः प्रसिद्धः ।
रूपैश्चतुर्भिः स्वयमेव जातो भक्तानुकम्पार्थमिहैव सत्यम् ।।२९
रूपं तदीयं समवेक्ष्य लोका धन्यं स्वकीयं जननं वदन्ति ।
भुक्त्वापि भोगान्विविधानजस्रं स्वानेव मुक्ता इति भावयन्ति ।।३०
अन्यत्र सर्वत्र हि मन्दिरेषु प्राप्यः प्रसादः परमत्र पुर्याम् ।
महाप्रसादः पुरुषोत्तमस्य क्षेत्रे प्रसिद्धो नवरं चिराय ।।३१
प्रासादमालाभिरलंकृतायां विश्वम्भरायामिह विस्तृतायाम् ।
क्षेत्रं हि पुर्या सदृशं न चान्यन्महाप्रसादः सुलभोऽत्र यस्मात् ।।३२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

१. मुधा= वृथा, २. नाक= स्वर्गम्, ३. तद्द्वारं= पुरीश्मशानं, स्वर्गद्वारनाम्ना प्रसिद्धम्, ४. वस्त्रवल्लीं= पताकाम्, ५. शयः= हस्तः, ६. बड्रं= विशालम्, उन्नतम्, ७. मिषेण= छलेन, ८. अभिख्यया= नाम्ना, ९. झाबुकः= झाउँ इत्युत्कलभाषायां प्रसिद्धो वृक्षः, १०. उहिष्यमाणः= यासां विवाहो निश्चितः, ११. प्रत्यग्रमूढाः= नवविवाहिताः, १२. चन्द्रक्षिघस्रेपु= दिवसेपु । 'अङ्कानां वामतो गतिः' इति नियमात् एकविंशत्यां दिनेषु इत्यर्थः, १३. व्यसुः= मृतः, १४. व्यङ्गानि = विकलानि।

—*—

वाराणसीवर्णना

चकास्ति[१] काशी सुचिरात्त्रिलोक्यां शूलोपरि श्रीशशिशेखरस्य।
पुराणशास्त्रेपु हि सुप्रसिद्धं विदो विदन्तः प्रवदन्ति नित्यम् ।।१
केचिज्जनाश्चापि महाश्मशानं त्रिकण्टकं चाप्यपरेऽविमुक्तम् ।
आनन्दपूर्वं वनमामनन्ति पुरीमिमां नाम्भिरेव लोके ।।२
यां वेष्टयित्वा वरणासिनद्यौ देवापगायां विलयं भजेते ।
सेयं विभर्ति प्रचुरां हि कीर्त्तिं वाराणसी शङ्करराजधानी ।।३
विहाय देहं लभतेऽमृतत्वं विश्वेश्वरानुग्रहतोऽत्र जन्तुः ।
स मृत्युकाले समुपेत्य कर्णे दिशेद्यतस्तारकमन्त्रराजम् ।।४
विभिन्नशास्त्रेपु कृतश्रमाणां विद्वद्वराणामिह सन्निधानम् ।
सम्प्राप्यते यादृशमन्यदेशे न तादृशं स्यात्सुलभं कदाचित् ।।५
यदीयनाम श्रुतिषु प्रसिद्धं तथा पुराणेष्वपि काव्यमध्ये ।
प्रिया पुरीयं प्रथितास्ति लोके विश्वेश्वरस्येति वदन्ति लोकाः ।।६
सत्यस्य रक्षार्थमिह प्रसिद्धः पुरा हरिश्चन्द्रनरेन्द्र एत्य ।
चण्डालभृत्योऽभवदेव सेयं काशी चिराद्राजति लोकमध्ये ।।७
शैवाश्च शाक्ताश्च वसन्ति गाढं न केवलं विष्णुमुपासमानाः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महम्मदीयैर्यवनैश्च साकं ख्रीष्टीयभक्ता विलसन्त्यपीह ।।८
जैनाश्च बौद्धाश्च कबीरमार्गानुगामिनो येऽपि भजन्त्यघोरम् ।
स्थित्वा श्मशाने सह तै रमन्ते वातात्मजं ये सततं भजन्ते ।।९
सङ्घर्षलेशो नहि लक्ष्यतेऽद्धा विश्वस्य भिन्नेषु मतेषु जातु ।
गङ्गाम्बुपानेन विशुद्धसत्त्वाः शान्त्या वसन्तीह चिराय चित्रम् ।।१०
गृहे गृहे संस्कृतपाठशाला प्रतिप्रतोलि [३]प्रकचत्यजस्रम् ।
पठन्ति वेदांश्च विभिन्नशास्त्राण्यासेवमाना वटवो गुरूंश्च ।।११
मुक्तावलीं कण्ठगतां विधाय मनोरमालोकनतत्पराणाम् ।
नोदेति भीर्लेशत एव यद्वत्संपश्यतां वारवधूं विटानाम् ।।१२
कश्चिद्रटित्वा शुकवद्धि मूढः प्रौढिं स्वकीयां प्रवदत्यनल्पम् ।
विकत्थनो ज्ञानहीनो विलज्जो धातुः प्रपञ्चे नितरां विचित्रः ।।१३
अधीत्य शास्त्राणि विनीतभावं सदा वहन्तो विलसन्ति केचित् ।
वाराणसीयोषिदलीक[१]देशे ललामभूता विबुधा महान्तः ।।१४
मालव्यसंस्थापितविश्वविद्यालयो महान् यः प्रथितः पृथिव्याम् ।
अस्यां नगर्यां परिशोभतेऽसौ विभिन्नदेशागतशिष्यवृन्दैः ।।१५
रुजां निवृत्तौ नितरां सुदक्षा ये नीवृति[४]ख्यातियुताः सुवैद्याः ।
अस्यां वसन्तो बहुदूरदेशागतान् गदेभ्यः परिमोचयन्ति ।।१६
स्वयुक्तिजालेन दिवापि नक्तं नक्तं त्वथो घस्रमिति ब्रुवाणाः ।
जयश्रियं वादे बलान्नयन्तो वाक्कीलमुख्या विलसन्त्यपीह ।।१७
यत्रार्णपूर्णास्ति विराजमाना दर्वीसुधाकुम्भकराह्यजस्रम् ।
किं तत्र वाच्यं नहि जातु पीडा क्षुधोऽत्र वेद्यं स्वयमेव विद्भिः ।।१८
घण्टाध्वनिं शङ्खरवञ्च तारं प्रातश्च सायं मठमन्दिरेषु ।
भक्त्यातिशय्यं जनमानसेषु श्रुत्वा समुत्पद्यत एव यत्र ।।१९
मनोहरानल्पतलान्वितानि वणिग्वराणां भवनानि दृष्ट्वा ।
यथार्थमूल्याकलनेऽसमर्था ग्रामागता विस्मयमाश्रयन्ते ।।२०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वज्रादिरत्नानि सुवर्णरौप्यादिधातवो येऽपि महार्घयुक्ताः ।
कौशेयवासांसि मनोहराणि पण्यालयेषु प्रविभान्त्यजस्रम् ।।२१
मुखश्रिया चन्द्रमहो जयन्त्यो गत्यापि हंसीरतिलज्जयन्त्यः ।
[5]जाम्बूनदाभाङ्गरुचिं दधत्यो यस्यां विराजन्ति विलासवत्यः ।।२२
स्कन्धेषु यूनां [6]शयमादधत्यो वैलक्ष्यशून्या विचरन्ति मार्गे ।
म्लेच्छाङ्गनाः बाह्यत आगता याः काश्चिद्युवत्योऽपि च भारतीयाः ।।२३
वेशेन काश्चित्पुरुषायमाणा गतत्रपास्तारमहो हसन्त्यः ।
प्रख्यापयन्त्यो निजनीचभावं जल्पन्त्यनल्पं कुलपांशुलाश्च ।।२४
अभिख्यया याः सुरसुन्दरीणां दर्पं ह्यनल्पं परिमर्दयन्ति ।
विनीतभावेन पथा व्रजन्त्यः स्वीयाभिजात्यं किल सूचयन्ति ।।२५
कुचोल्लसत्काञ्चनदामिनीनां स्मरारवैर्यापितयामिनीनाम् ।
विभासते यत्र च कामिनीनां कदम्बकं वारणगामिनीनाम् ।।२६
मठा अनेके यतिपुङ्गवानां दुर्वृत्तवृन्दैः कवलीकृता हा ।
सङ्गीतशिक्षाप्रचलत्यजस्रं कुत्रापि धिक्कालविपर्ययेण ।।२७
कलेः प्रभावाद्यतयोऽपि नष्टाः क्वचित्क्वचित्केचन वा भवन्ति ।
नेपथ्यमात्रं परिधाय दुष्टाः स्थानेषु तेषां निवसन्ति हृष्टाः ।।२८
प्रतिग्रहो यो नितरां हि घोरो गृहस्थविप्राय हि शास्त्रकारैः ।
मन्वादिभिः प्रोक्त इमे विमूढास्तुर्याश्रमे हा कथमाश्रयन्ते ।।२९
पत्नीं स्वकीयामथ सेविकां वा शिष्यामुताहो मठवासिनीं वा ।
विधाय मूढा निरयस्य मार्गं प्रसह्य केचित्समुपाश्रयन्ते ।।३०
श्रीविश्वनाथः सुचिराच्चकास्ति विश्वस्य वन्द्योऽत्र हि वाराणस्याम् ।
यन्मन्दिरं हा यवनाः विभज्य प्रसह्य चक्रुर्मसजीदमुच्चैः ।।३१
आलोक्य यद्दूयत एव कामं हिन्दूजनानां हृदयं प्रकामम् ।
डिम्बः[7] कदाचिद्धि भवेदिहेति प्रशासनं शङ्कत एव नित्यम् ।।३२
सशस्त्रसेना निहिता ततो वा[8] अहर्निशं सास्ति हि जागरुका ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वाधीनराष्ट्रं कथमुच्यते हा विभाजनं केवलमेव लाभः ।।३३
कालस्य संसूचनमेव लक्ष्यं यथा घटीयन्त्रचयस्य लोके ।
यन्त्रस्य भंक्त्या नहि जातु नाशो भवेत्कदाचित्समयस्य तस्य ।।३४
अनाद्यनन्तो हि यथा स कालस्तद्धेतुभूतः खलु विश्वनाथः ।
लिङ्गन्तु तस्य स्मरणाय स्याद्वै न लिङ्गनाशेन तदीयहानिः ।।३५
इदन्तु तत्त्वं प्रविदन्ति विज्ञाः परं सुनीचैर्यवनैः पिशाचैः ।
भंक्त्वेशलिङ्गं सुदृढः प्रहारः कृतोऽस्ति नूनं खलु भारतस्य ।।३६
न हिन्दवस्ते नितरां जघन्या ये हिन्दुमात्मानमहो वदन्तः ।
स्वार्थस्य हेतोस्तनयां स्वसारं पत्नीमुताल्लामपि[9] चार्पयेयुः ।।३७
प्रवञ्चयन्तो जनतां सुमुग्धां माध्वीकधारासदृशैर्वचोभिः ।
मतानि नीत्वा न गणस्य सौख्यं मनागहो धिङ्मनसा स्मरन्ति ।।३८
मुक्तिप्रदात्रीषु पुरीषु काशी चकास्ति येयं तरलायमाना ।
तस्यां पुनर्हा नितरां जघन्या बीभत्सभावा वरीवर्ति सूना[10] ।।३९
भवन्ति कीटाः कुसुमेषु यद्वत्सन्त्यत्र केचिन्निपुणा हि चौराः ।
मुष्णन्ति साधून् सरलांश्च वित्तं क्षणेन विश्वास्य च यत्र तत्र ।।४०
घट्टान्यनेकानि विनिर्मितानि नृपैरनेकैर्धनिकैश्च सद्भिः ।
स्नानाय पानाय जलं ग्रहीतुं गङ्गातटे सर्वजनस्य रम्ये ।।४१
सतर्पणं श्राद्धमथोऽत्र पूजां कुर्वन्ति भक्त्या वहवो हि लोकाः।
यच्छन्ति वस्तूनि महीसुरेभ्यः सद्भ्योऽथवा दीनजनेभ्यः एत्य।।४२
गङ्गातटं पूततमं जनैर्यत्सम्मान्यते तत्र [11]हदन्ति पापाः ।
वर्ज्यानि वस्तूनि विवेकहीनाः क्षिपन्ति तोये नहि तत्र दण्डः ।।४३
निमील्य नेत्रे किमु सर्वकारः स्वपित्युताहो नहि वा सजीवः ।
न चण्डदण्डः कथमत्र हेतुर्न ज्ञायते चिन्तयतापि यस्मात् ।।४४
एतादृशं दृश्यमहो विलोक्य वैदेशिकाः ये समुपासरन्ति ।
किं चिन्तयेयुर्निजजन्मभूमौ किं वा वदेयुः स्थितिमेतदीयाम् ।।४५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सद्बुद्धिमेभ्यः प्रददातु तूर्णं श्रीविश्वनाथो गिरिजाद्वयी च ।
असभ्यकृत्यानि विहाय चैते भवन्तु धर्म्ये पथि सम्प्रवृत्ताः ।।४६
गङ्गातटं स्यात्सुपरिष्कृतं द्राक् प्रशासनं वा अपि जागरूकम् ।
जलस्य शुद्ध्यै नगरप्रणाल्यो निपातनीया न सरित्सु जातु ।।४७
परिष्कृतिः काम्यत एव सर्वैर्विलम्बनं नात्र भवेत्कदाचित् ।
आदर्शभूतास्तु वराणसी नः श्रीविश्वनाथस्य कृपावशाद्द्राक् ।।४८
स्मरहरनगरीयं केवलं भारते नो विदितमिह जगत्यां भारतीकेलिगेहम्।
सकलकलुषहन्त्री लोलकल्लोलमाला सुरसरिदियमेतां सेवते शश्वदस्मात्।।४९
नाहं कविर्नैव च पण्डितो वा गीर्वाणवाण्याः परिचारकोऽस्मि ।
जीयादियं भारतवर्षमध्ये धियानया संरचयामि किञ्चित् ।।५०
श्रीसुन्दरीगर्भसमुद्भवेन लक्ष्मीधरेणात्मभुवा[१२] कुलस्य[१३] ।
काश्यामुषित्वोत्कलदेशजेन व्यधायि वाराणसीवर्णनेयम् ।।५१

१. चकास्ति= शोभते, २. प्रकचति= शोभते, ३. अलीकं= मस्तकं, ४. नीवृति= देशे, ५. जाम्बूनदं= सुवर्णम्, ६. शयं = हस्तं, ७. डिम्बः= कलहः, ८. वै+अहर्निशमिति पदच्छेदः, ९. अल्लाम्= मातरम्, १०. सूना= वधस्थानम्, ११. हदन्ति= मलं त्यजन्ति, १२. आत्मभुवा= पुत्रेण, १३. कुलस्य= कुलमणेः ।

—*—

कलाटीवर्णनम्

सुरम्यहर्म्यैरभिभूष्यमाणा [१]केरैरनेकैरभितोऽतिरम्या ।
न कालटीयं मम रोचतेऽद्धा परेण पुंसा वनितेव रक्ता ।।१
विहाय हा श्रौतमतं वराका वैदेशिकानां मतमादधानाः ।
अत्रत्यलोकाः प्रचरन्त्यभीक्ष्णं विस्मृत्य लोकान्तरयातनानि ।।२
स्वप्नेन तुल्यं जगदेतदेव मिथ्या न सत्यं सुखदुःखयुक्तम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धर्मस्तु नित्यः स हि वेदवेद्यः स्वर्गश्च मोक्षश्च ततः प्रसिद्ध्येत् ।।३

सुधोपमा वाच इमा मुखाब्जात्पुरा तु यस्यैव विनिर्गता हा ।
ग्रामे तदीये निवसन्त एते कुर्वन्ति किं धिक् समयो वलीयान्।।४

आचार्यवर्यस्य हि जन्मभूमिः श्रीशङ्करस्येयमिति प्रहृष्टाः ।
श्रद्धातिशय्यात्समुपेत्य लोका नैराश्यदुःखं भृशमाप्नुवन्ति ।।५

यत्राग्निहोत्रस्य पुरा सुधूमैः वृक्षाग्रवासा अपि राजहंसाः ।
न पान्थदृष्टौ परितः पतन्ति सेयं कलाटी मम सम्मुखे किम्?।।६

प्रत्यग्र[२]वर्षं ह्यभिनन्दयन्तो यद्यावनं जातु न भारतीयम् ।
चित्राणि ऋक्षाणि[३] च संरचय्य पुरो गृहाणां किल लम्बयन्ति ।।७

परम्परां स्वां मनसोऽपहाय स्वीया परेषामिति चिन्तयन्तः ।
प्रमोदयोगात्परितो भ्रमन्ति स्फीतोरसो हा तरुणास्तरुण्यः ।।८

निपीय बीटी[४]र्वदनान्तरेभ्यो विनिर्गतैर्धूमचयैः समन्तात् ।
भ्रमन्त एते ह्यवरा युवानो यदृच्छया खं परिदूषयन्ति ।।९

प्रातर्न सायं रवयेऽर्घ्यदानं वेदध्वनिर्नो मठमन्तरेण ।
वाचा यवन्या गगनान्तरालं ध्वानेन तारेण तु पूर्यते हा ।।१०

तुरुष्क[५]-गोरण्ड[६]-मतावलम्बात् गतत्रपाः पापभयेन हीनाः ।
मार्गे चरन्तस्तरुणास्तरुण्यः कुर्वन्ति सत्यं सफलं प्रदोषम् ।।११

पूर्णातटेऽतीवपुरातनं यद्रमापतेर्मन्दिरमत्र मञ्जु ।
प्रातश्च सायं समुपेत्य भक्तास्तत्रार्च्चयन्तः प्रणमन्ति नित्यम् ।।१२

सम्पूज्य देवं विविधोपचारैः स्वाभीष्टसिद्ध्यै मनसार्थयन्ते ।
पुण्यं प्रसादं शिरसाभिनन्द्य प्रयान्ति नैजं भवनं प्रहृष्टाः ।।१३

तदेकमेवास्ति हि मूकसाक्षि प्राचीनधर्मस्य धरातलेऽस्मिन् ।
श्रीशारदापीठयतीश्वरेणा मठः स्थापित आचकास्ति ।।१४

पठन्ति वेदान् बटवोऽत्र नित्यं दूरात्समायान्ति च भक्तलोकाः ।
स्नात्वा च पूर्णासलिलेऽर्च्चयन्ति प्रसादनार्थं ननु देववृन्दम् ।।१५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सेयं सरिद्वा जननीकृते प्रागानायि संप्रार्थ्य हि शङ्करेण ।
दूरे वहन्ती निकषा स्वगेहं प्रादर्शि बाल्येऽपि निजप्रभावः ।।१६
दिनेष्वनेकेषु गतेष्वपीह श्रद्धास्ति काचिज्जनमानसेषु ।
तस्मात्समायान्ति सुदूरदेशाल्लोका अनल्पा खलु धर्मनिष्ठाः ।।१७

१. केरैः= नारिकेलैः, २. प्रत्यग्रं= नूतनम्, ३. ऋक्षाणि= नक्षत्राणि, ४. बीटी= सिगारेट्(आंग्लोभाषा), ५. तुरुष्कं= मुसल्मान, ६. गोरण्ड= खृष्टीयान् ।

—*—

गोमुखदर्शनम्

तीर्थेषु भूमौ प्रथमं प्रदिष्टं द्वारं हरेर्यत्परिकीर्त्यते च ।
दिदृक्षवो गोमुखमेव तस्मात्समाश्रयन्ते द्रविणेन यानम् ।।१
प्रयाति यानं गिरिगात्रमार्गे समुच्चदेशं क्रमशः सशब्दम् ।
शनैः शनैर्नीरवतां विदार्य संसृज्य भीत्या सहकौतुकञ्च ।।२
आरुह्य शृङ्गं पुनरप्यधस्तात् शनैश्च यानं क्वचिदेव याति ।
उच्चावचं पर्वतगात्रमत्र प्रीतिं च भीतिं जनयत्यभीक्ष्णम् ।।३
विश्रम्य यानं क्वचिदेव मध्ये चायस्य पानाय ददाति दिष्टम् ।
क्वचिच्च पान्था अपि धूमवीटीं हृष्यन्ति ताम्बूलमथाददानाः ।।४
यानस्य वातायनतः सुदृश्या ग्रामा गिरेर्भान्ति मनोहरास्ते ।
क्रमोच्चसोपानसमानि शस्यक्षेत्राणि कर्षन्ति बलेन दृष्टिम् ।।५
पार्श्वान्तरे श्यामलवृक्षपूर्णा अभ्रंकषाः शैलचयाः सुरम्याः ।
आलेख्यलेखाः प्रविभान्ति किंस्वित्सुकारुणा कूर्च्चविनिर्मिता वा ।।६
काचित्किशोरी कलशं स्वमध्ये निधाय नीराय नदीं प्रयान्ती ।
यानं व्रजत्पश्यति निर्निमेषं पार्श्वान्तरस्था चकितातिवेलम् ।।७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विश्रम्य विश्रम्य हि मार्गमध्ये दिदृक्षुवृन्दस्य सुखाय सम्यक्।
प्रयाति यानं क्रमशः शनैस्तां गङ्गोत्तरीं यां कथयन्ति लोकाः।।८
गङ्गामवाप्तुं तुहिनाचले प्राक् भगीरथो यत्र तपश्चकार ।
रम्या स्थली सा प्रथिता चिराय गङ्गोत्तरीति प्रविभाति लोके।।९
तदीयगव्यूतियुगेऽल्पदूरे गङ्गाप्रवाहः समुदेति यत्र ।
भूगर्भतः कन्दरमध्यभागे तत्कीर्त्त्यते गोमुखनामधेयम् ।।१०
नह्यत्र किञ्चित् सह गोमुखेन साम्यं मनाग्दृष्टिपथं प्रयाति ।
जनाः परं रूढिवशाच्चिराय स्थानं त्विदं गोमुखमामनन्ति ।।११
गोशव्दमाहुः खलु कोशकारा जलं तथा निःसरणं मुखं यत् ।
सङ्गच्छते तेन हि गोमुखं तद् ब्रुवन्ति लोका इति तर्कयामः ।।१२
न यन्त्रयानस्य गतिस्ततः स्यात्स्थानात्कथञ्चिद्यत एव पद्भ्याम्।
गन्तव्यमेवाश्वतरेण किं वा हयेन शुल्कं धनिभिः प्रदाय ।।१३
वाञ्छन्ति ये गोमुखदर्शनाय व्रजन्ति ते दुर्गममार्गमध्ये ।
न बालवृद्धाः प्रभवन्ति गन्तुं विहाय शक्तांस्तरुणान् कथञ्चित्।।१४
सव्ये तुषारावृतशृङ्गमाला नभःस्पृशः सन्ति हि पङ्क्तिबद्धाः ।
दक्षे गभीरेऽवट एव गङ्गाखरप्रवाहातिकृशा चकास्ति ।।१५
मध्ये नितम्बं रचितोऽस्तिमार्गोऽत्यन्ताप्रशस्तः पथिका व्रजन्ति ।
तेनैव भीताश्चरणः कदाचित् स्खलेद्यदि स्यान्मरणं ध्रुवं हि ।।१६
आरुह्य वाहं यदि कश्चिदाढ्यो निवर्त्तते तन्महती समस्या ।
सङ्कीर्णमार्गे कथमेव गम्यं चिन्ताभिभूतो भवतीह पान्थः ।।१७
मार्गस्य पार्श्वे गिरिगात्रदेशेऽध्वनीनवर्गस्य हि सूचनाय ।
लेखाश्च संख्याः क्वचिदन्तरेण वेक्ष्याप्रमत्तश्चलतीह लोकः ।।१८
विलोक्य पान्थान् हरिणाः समुच्चैरुत्प्लुत्य भीमं प्रविशन्त्यरण्यम्।
विहङ्गमानां कलकाकली किं सुस्वागतं व्याहरतीह मञ्जु ।।१९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्वचित्प्रवाहो गिरिनिर्झराणां मञ्जुध्वनिः कर्षति चित्तवृत्तिम् ।
तल्लंघनाय द्रुमशुष्कगात्रं करोति यात्रिव्रजसेतुकार्यम् ।।२०
वेशेन मार्गे पुरुषायमाणा स्मित्वा 'नमस्ते' परिकीर्त्तयन्ती ।
निर्भीकभावेन भृशं प्रसन्ना वैदेशिकी कापि च याति तूर्णम् ।।२१
मार्गस्य मध्ये विजनप्रदेशे श्रीलालबाबाश्रममाश्रयन्ते ।
रात्रौ जना यत्र न दुःखलेशं जानन्ति विश्रम्य समादरेण ।।२२
उष्णोदकं भोजनमत्र सम्यङ्निरुद्धवातायनगेहमध्ये ।
स्थूलोर्णवस्त्रैः समुपेतशय्यामासाद्य निद्रासुखमाप्नुवन्ति ।।२३
प्रगे निवर्त्त्य स्वककृत्यजातं ततः प्रयान्ति क्रमशोऽध्वनीनाः ।
तृणैर्विहीने तरुभिश्च शून्ये सुविस्तृते शर्करिले हि मार्गे ।।२४
विशङ्कटैरश्मभिराचितोऽयं तुषारशीतैः पवनैश्च देशः ।
दिदृक्षुयात्रिव्रजमानसेषु प्रकाममाविष्कुरुतेऽत्र भीतिं ।।२५
आदौ गिरेर्यत्र गुहान्तरालादुदेति भूगर्भत एव तोयम् ।
शैत्येन दुःस्पर्शमतीव तत्र श्रद्धालवः स्नान्ति वृषस्य वाप्त्यै ।।२६
कपर्दतो नैव सदाशिवस्य गङ्गाम्बुधारा धरणौ पतन्ति ।
विलोक्यते क्वापि यथा पुराणे वदन्ति पौराणिकवृद्धलोकाः ।।२७
प्रशान्तमेतन्नितरां विविक्तं प्रपञ्चचिन्तारहितं प्रशस्तम् ।
रोचेत तेभ्यो नितरां हि येषां मनागपिस्यान्न भोगेषु चित्तम् ।।२८
तदूर्ध्वदेशेऽस्ति वदन्ति लोका वनं प्रसिद्धं खलु चन्दनाख्यम् ।
ततोऽपि यन्नन्दननामधेयं व्रजन्ति केचिद् विरलास्तु तत्र ।।२९
निसर्गशोभापरिदर्शनेच्छा समुत्कटा चेतसि यस्य नित्यम् ।
प्रयात्वसौ नैव निवारयामः परं स्थलं दुर्गममेव गाढम् ।।३०

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कटकवर्णनम्

उड्रप्रदेशे कटकं मनोहरं विभ्राजते यन्नगरं पुरातनम् ।
वीराग्रगण्यो विबुधप्रियः सुधीः प्रत्यष्ठिपत्तन्नृपकेशरी नृपः ।।१
प्रसूर्यथाङ्के तनयं सुवत्सला स्नेहेन धत्ते सुजला महानदी ।
तथा निवेश्यारिभयात्समन्ततः समृद्धिमद्यत्सततं सुरक्षति ।।२
यत्रातिभक्तो जगदीश्वरे भृशं रराज राजा पुरुषोत्तमः पुरा ।
पद्मावतीं काञ्चिनरेन्द्रनन्दिनीं विजित्य युद्धे विदधेऽङ्कशायिनीम्।।३
यस्यैव नुत्या भगवान् जगत्पतिः पदातिवेशेन गतो रणाङ्गनम् ।
अस्यैव दुर्गात्प्रवदन्ति तद्विदः कथामिमामुत्कलकीर्तिकोविदाः ।।४
अध्यासते यत्सुचिरात्समागतास्तैलङ्गवङ्गोक्तिवदा विदो जनाः ।
पाञ्चालकाश्मीरजनाश्च गुर्जरप्रदेशतोऽपि बहवोऽत्र संस्थिताः ।।५
वाणिज्यसेवाश्रमकर्मजीविनो विस्मृत्य भेदान् कटकाभिवृद्धये ।
समीहमाना निवसन्ति निर्भयं परस्परं स्नेहगुणेन यन्त्रिताः ।।६
प्राचीनदुर्गं खलु वारवाटीनाम्ना प्रसिद्धं समुपागतेभ्यः ।
मौनेन वक्ति स्वकदुःखजातं पूर्वप्रतिष्ठास्मरणेन यत्र ।।७
तस्यैव नाम्ना निकटे तदीये क्रीडाङ्गने खेलविदो विशालम् ।
यशोऽधिगन्तुं द्रविणं च वाप्तुं स्पर्द्धन्त एत्यात्र जनाः प्रसिद्धाः ।।८
वन्याप्रकोपान्नगरस्य रक्षां कर्तुं शिलाभीरचितं समुच्चम् ।
विलोक्य लोकाः परितः सुबन्धं यत्रातिमात्रं खलु विस्मयन्ते ।।९
वैदेशिकोऽप्युत्कलदेशरागी मनीषिमुख्यः स उदारचेताः ।
रेभेन्सनामा विदधे महान्तं विद्यालयं यत्र भुवि प्रसिद्धम् ।।१०
अधीत्य विद्या विविधा युवानः सर्वत्र देशे प्रथयन्ति कीर्तिम् ।
अत्रैव संस्था प्रविभातु शश्वत्तदीयनाम्ना भगवत्प्रसादात् ।।११
ध्वजायमानो वत भञ्जवंशे श्रीरामचन्द्रो नृपतिर्मनस्वी ।
प्रत्यष्ठिपद्वैद्यकशिक्षणस्य प्रख्यातसंस्थां जनतोपकृत्यै ।।१२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आयान्ति देशस्य रुजाभिभूताः प्रयान्त्यरोगाश्च चिकित्सया ये ।
स्तुवन्ति सर्वत्र चिकित्सकानां गुणानजस्रं मुदितान्तरङ्गाः ।।१३
न्यायं प्रदातुं सुविचारपूर्वं निष्पक्षपातं सकलप्रजाभ्यः ।
य उच्चपूर्वः परिकीर्त्यतेऽत्र न्यायालयोऽसौ सुचिराच्चकास्ति ।।१४
महामनीषी मधुसूदनश्च दयार्द्रचेता अपि गोपबन्धुः ।
यावुत्कालानां धुरिकीर्त्तनीयौ यत्रोषतुः प्राग् जनमङ्गलाय ।।१५
चण्डीश-चण्डी-विधुमन्दिराणि विभिन्नवर्णध्वजशोभितानि ।
यत्रानिशं भक्तियुतैर्जनौघैः प्रातश्च सायं परिपूरितानि ।।१६
सुदीर्घसेतुद्वयसंयुतं यत् स्थानान्तराणां गमनस्य हेतोः ।
सौविध्यमत्यन्तमहो विधत्ते यानैरनेकैर्गमनोत्सुकानाम् ।।१७
सस्नानशौचालयसंयुतेषु महार्हशय्यस्तरणाञ्चितेषु ।
विभिन्नसौविध्यसमन्वितेषु समुच्चहर्म्येषु मनोहरेषु ।।१८
नवागताभिर्निजवल्लभाभिराढ्या युवानः प्रचुरं हिरण्यम् ।
संवेशनायोचितसौख्यहेतोर्यान्ति प्रदाय क्षणदासु यत्र ।।१९
कादम्बिनीचुम्बनतत्परेषु विभिन्नवर्णैरपि रञ्जितेषु ।
हर्म्येषु नित्यं धनिनो रमन्ते शैत्योष्णपीडारहितेषु यत्र ।।२०
कार्याणि सम्पादयितुं दरिद्रा ये दूरदेशात्समुपासरन्ति ।
तेषां निवासाय हि धर्मशाला निर्मापिता आढ्यजनैरनेकाः ।।२१
द्विचक्रचक्रत्रयसंयुतानि चक्रैश्चतुर्भिः समलंकृतानि ।
तैलेन्धनेन प्रचलन्त्यजस्रं यानानि मार्गेषु रयेण यत्र ।।२२
अतीवसूक्ष्मैरपि राजतैर्वा जाम्बूनदैस्तन्तुभिरेव यत्र ।
विभूषणानि प्रविभान्ति शिल्पिव्रजैर्मनोज्ञानि विनिर्मितानि ।।२३
लुलायशृङ्गैरपि दन्तिदन्तैर्निर्माय वस्तूनि मनोहराणि ।
स्वल्पेन मूल्येन हि तानि कारुः क्रेतुं विपण्यां ह्वयतीह पान्थान् ।।२४
सुदूरदेशात्समुपागतेभ्यः प्राणं ददाना गदपीडितेभ्यः ।
शल्यक्रियायां कृतभूरियत्नाः सन्त्यत्र नित्यं बहवः सुवैद्याः ।।२५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वित्तं प्रकामं परिवञ्चनेन ग्रामीणलोकात् समुपार्जयन्तः ।
युगस्य तिष्यस्य सुतायमाना वाक्कीलधूर्त्ता बहवोऽत्र सन्ति ।।२६
विस्मृत्य वैरं च सौहार्दयुक्ता ख्रीष्टानुगैर्मोहमदैश्च सार्द्धम् ।
बौद्धैश्च जैनैः सममत्र वासं कुर्वन्ति वेदानुगता जनाश्च ।।२७
पारे सहस्रं किल वत्सराणां व्यतीतमद्यापि पुरेव भाति ।
श्रीचण्डिकायाः दयया धरण्यां स्वगौरवं ख्यापयतादजस्रम् ।।२८

—*—

भुवनेश्वरम्

काश्यां प्रभासे च हिमालये वा श्रीशैलशीर्षे त्वथवास्तु सेतौ ।
लिङ्गानि सर्वत्र विभान्ति सत्यं सदाशिवस्याखिललोकमुक्त्यै ।।१
श्रीलिङ्गराजो भुवनेश्वरेऽस्मिन्नेकाम्रदेशे सुचिराद्विभाति ।
जानन्ति सर्वे बुधपुङ्गवा ये पुराणतत्त्वानि गवेषमाणाः ।।२
नाम्नार्षभाद्वा[१] प्रथिता नृपाद्वा [२]दौषन्त्यभिख्यावशतो भवेद्वा।
इयं धरा भारतवर्षसंज्ञां धत्ते पृथिव्यां प्रविदन्ति सर्वे ।।३
काश्मीरपाञ्चालमुखाः प्रसिद्धास्तत्रापि देशा बहवो भवन्ति ।
प्राथम्यमासादयते कलाभिस्तथापि तेषूत्कलदेश एषः ।।४
महानदी पूतजलातिभव्या सरित्पतेः सङ्गमवाप्य भाति ।
[३]द्वीपान्तपारेति सुनामधेयः पोताश्रयः सम्प्रथितोऽस्ति यत्र ।।५
हीराकुदाख्यो हि विशालसेतुर्विनिर्मितो यत्र विभाति दूरात् ।
उत्पाद्य लौहं प्रहिणोति दूरान् [४]रावूरकेला विविधान् हि देशान् ।।६
कोणार्कतीर्थं नितरां प्रसिद्धं ब्राह्मे पुराणे गदितं यतः प्राक् ।
यत्कारुकर्माणि निशाम्य सम्यग् वैदेशिका मुग्धहृदो भवन्ति ।।७
पुर्यां जगन्नाथविलोकनेन को वा कृतार्थं मनुते न हि स्वम् ।
तस्योत्कलस्यास्ति हि राजधानी [५]नवीनरम्या भुवनेश्वराख्या ।।८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुहृद्वधामर्षित उग्रतेजाः काशीनरेशस्तपसा प्रसाद्य ।
द्वारावतीप्लोषण[६]दक्षकृत्यां श्रीविश्वनाथाद्वरमाशु लेभे ।।९
आचक्रमे यादवराजधानीं वरेण दृप्तः स हि दुष्टबुद्धिः ।
एतद्विदित्वा प्रभुचक्रपाणिश्चक्रे शिरस्तस्य तनोर्विभिन्नम् ।।१०
वाराणसीं चक्रवरेण दग्ध्वा समागतः शङ्करमाशु कृष्णः ।
उवाच रुष्टः कुरुषे किमित्थं ? हन्तुं वरं मां प्रददासि तुष्टः ।।११
भक्तस्य भक्त्या सकलं विधातुं त्वं भोः समर्थः खलु लोकमध्ये ।
पत्नीं कदाचित्प्रददासि भक्त्यात्मानञ्च सम्पातयसे विपत्तौ ।।१२
भस्मासुरायाशु वरं प्रदाय त्वं विह्वलः किं विजयाप्रमत्तः ।
अध्यासितुं काशिमतःपरं त्वं नार्हसि [७]याह्युत्कलनीवृतं द्राक् ।।१३
एकाम्रसंज्ञेऽतिमनोज्ञदेशे रमस्व गौर्या गिरिराजपुत्र्या ।
कलौ तवावस्थितिरस्तु तत्र प्रयच्छ भक्तेषु वरं प्रकामम् ।।१४
सम्यग्विचार्यैव तु भूय एवं प्रभो कदाचिन्न हि कार्यमाशु ।
भवेत्कदाचिन्न महाननर्थस्त्वदीयविश्वे करुणाम्बुराशे ।।१५
गौरीसहायस्तत एव शम्भुर्विहाय काशीं निजराजधानीम् ।
स्थानं प्रपेदे भुवनेश्वराख्यं नाम्ना तदीयेन च तत्प्रसिद्धम् ।।१६
तन्नामवीजं प्रविदन्ति विज्ञाः पुराणशास्त्रेषु कृतश्रमा ये ।
वालाववोधाय विलिख्यतेऽत्र प्रशंसनायापि च राजधान्याः ।।१७

---

१. आर्षभाद्= ऋषभपुत्रात्, २. दौषन्त्यात्= दुष्यन्तपुत्रात्, ३. द्वीपान्तपारेति= पाराद्वीप, ४. रावूरकेला= राउरकेला, ५. नवीनरम्या= नूतनरमणीया, नवीनपट्टनायकेन रमणीया च, ६. प्लोषण= दहन, ७. नीवृतं = देशं, स्कन्दपुराणे वर्णितमेतत्सर्वमनुसन्धेयम् । भागवते १०/६६ तमाध्याये काशीदहनं केवलमस्ति । (स्कन्दपुराणमवम्ब्यलिखितमेतत्) ।

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुरुप्रशस्तिः

काव्यव्याकरणादिशास्त्रकुशलो देवार्च्चनातत्परः
श्रौतस्मार्तविचारपाटवयुतः शान्तः सुधीरो गुणी ।
शिष्यस्नेहपरायणोऽस्ति मधुरालापान्वितो धार्मिको
विद्वन्मण्डलमण्डनो विजयते श्रीरामचन्द्रः सुधीः ।।१
यत्तातः सोमनाथः सुविमलमतिमान् सर्वविद्यावदातः
ख्यातो विद्वत्समाजे वृजिनविरहितो विष्णुभक्त्यातिपूतः ।
चम्पादेवीतिधन्या युवतिकुलवरा स्वामिभक्ता प्रशस्ता-
भिख्यायुक्ता सवित्री गुणगणनिलया यस्य पूज्यातिरेका ।।२
पुराभिधं कीर्तनपूर्वमस्य ग्रामो जनिः ख्यापयतीह लोके ।
विभिन्नशाखासु च संस्कृतस्य च्छात्रा यदीयाः कृतिनो भवन्ति ।।३
याजुषः काण्वशाखीयः कौशिकान्वयसम्भवः ।
जीयाच्चिरमसौ विद्वान् कीर्त्त्या त्वतुलयान्वितः ।।४

—*—

दिगम्बरप्रशस्तिपञ्चकम्

नमो नमस्ते महते विपश्चिते दिगम्बरायामितभाग्यशालिने ।
सुपर्ववाणीपरिचर्यया हि योऽधुनाप्यवाप्नोति च राष्ट्रमाननम् ।।१
दिगङ्गनाङ्गावरणं यशोऽम्बरैर्यतो व्यधास्त्वं सुकवे ततो ध्रुवम् ।
दिगम्वराख्या सफला तवाञ्जसेति मे मतिर्जायत एव सम्प्रति ।।२
एपोऽस्ति पात्रेषु महान् विचक्षणस्ततः समर्च्यो ध्रुवमेव निश्चयात् ।
यस्मै स्वयं राष्ट्रपतिः समार्चयत्कस्तं नमेन्नो गुणिनं न वेद्म्यहम् ।।३
गानं च वाद्यं सह चित्रविद्यया तथा च काव्यं सरसं विधाय वै ।
जनान्तरे यस्य पदं दृढं चिराद्दिगम्वरोऽसौ जयताच्छतं समाः ।।४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अमर्त्यवाणीपरिचर्यया सुधीर्ध्रुवं प्रयायादमरत्वमञ्जसा ।
तदीयपादाङ्कमथापरे बुधा अजस्रमन्विष्य भवन्तु संस्तुताः ।।५

(पण्डितदिगम्बरमहापात्रः स्वजन्मना उत्कलप्रदेशान्तर्गतकटकमण्डलस्य 'बाङ्की' अनुविभागे 'पुरुणापाणि'ग्रामं धन्यं करोति । राष्ट्रपतिसम्मानितोऽयं अशीत्यधिकवया इदानीमपि संस्कृतभारतीं काव्यादिरचनया सेवते। तेन विरचितानि 'सुरेन्द्रचरितमहाकाव्य-रुषियाशतक-स्वर्णवङ्गादयः पञ्चदशाधिकाः ग्रन्थाः सन्ति । सङ्गीतचित्रयोगासनादिष्वपि तस्य प्रतिभा प्रशंसनीया । संस्कृतश्लोकान् विभिन्नरागैः गायन्नेष श्रोतॄन् विमुग्धान् करोति। श्रीजगन्नाथकृपयैष विद्वान् सुचिरं जीवन् सुरभारतीं सेवतामित्याशास्यते ।)

—*—

सुन्दरराजशुभाशंसा

यः सुन्दरो हि वपुषा च गुणैरनेकैः संख्यावतां धुरि सदा चलति स्वशक्त्या।
गीर्वाण्यवाण्युपचितौ निरतो महात्मा सम्माननं तदीयमेव नितान्तयोग्यम् ।।१
यत्काव्यराजिरतितमञ्जुलमञ्जरीभ्यः स्यन्दन्मरन्दमधुरा बुधभृङ्गवृन्दम् ।
सम्मोदयत्यतितरां स कवीन्द्रवन्द्यः श्रीसुन्दरो विजयताच्चिरमत्र लोके ।।२
इन्द्रेड्यपादसरसीरुहचन्द्रवक्त्रो वृन्दारकारिगणध्वंसनधूमकेतुः ।
सन्दानितं जगदिदं कुहकेन यस्य सोऽव्यात्सदा ज्ञवरसुन्दरराजसंज्ञम् ।।३
स्थित्वापि भारतप्रशासनसूच्चकार्ये योऽसेवतानवरतं सुरभारतीं ज्ञः ।
श्रीशाङ्घ्रिवारिजमिलिन्दमतिः कवीन्द्रो लप्सीष्ट मोदमतुलं भगवत्प्रसादात् ।।४
यो द्राविडे द्विजकुले किल लब्धजन्मा नीलाचलाधिपपदाम्बुजभक्तियुक्तः ।
प्रीत्योत्कलेषु भुवनेश्वर एव तिष्ठन् संसेवते सुरगिरं स भवेच्चिरायुः ।।५

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थना

‘विद्या ददाति विनयं’ पठितं मया प्राक् दृष्टोऽधिकाशि[1] समुपेत्य सुभाग्यतो मे।
विद्वद्वरोऽतिसरलो मधुरस्वभावो दृष्टान्त एष मुरलीधरनामधेयः ।।१
यो व्याकृतिं[2] च कपिलागम[3]वेदशीर्षे[4] नो वेत्ति केवलमहो विविधागमांश्च ।
कृत्वा श्रमं पठितवान् विविधांश्च शिष्यान् अध्यापयत्यपि मुदा सुतनिर्विशेषम् ।।२
सेवानिवृत्तमपि यं समुपेत्य शिष्या नक्तन्दिवं विविधशास्त्रचयेषु नित्यम् ।
संसेव्य पाठनविधावलमर्थयन्तेऽधीत्यापि मोदमतुलं नियतं लभन्ते ।।३
दुःखं स्वकीयमपि यो विगणय्य धीमान् शङ्कापसारणमहो विदुषां करोति ।
[5]वैपश्चितीं प्रणयिनीं परिरभ्य गाढं [6]वैधुर्यविस्मरणमेव सदा विधत्ते ।।४
काशीवधूशिरसि यस्तिलकायमानो दर्पोऽपि यस्य हृदये न पदं निधत्ते ।
विश्वेश्वरः करुणया मुरलीधरं तं [7]नैरुज्यभाजमनिशं सुचिरं विधत्ताम् ।।५

(काश्यां आचार्यमुरलीधरपाण्डेयाभिनन्दनग्रन्थे प्रकाशिता ।)

१. अधिकाशि= काश्याम्, २. व्याकृतिं= व्याकरणम्, ३. कपिलागमः= सांख्यम्, ४. वेदशीर्षं= वेदान्तः, ५. वैपश्चितीं= पाण्डित्यम्, ६. वैधुर्यं= विपत्नीकता, ७. नैरुज्यभाजं= स्वस्थम् ।

—*—

चन्द्रशेखरप्रशस्तिपञ्चकम्

यश्चन्द्रशेखर इति प्रथिताभिधानः कीर्त्या सदामरशरीरधरो महात्मा।
नो खण्डपत्तनभुवं नहि चोत्कलं वा प्राग् भारतं स्वजनुषा[1] समलञ्चकार।।१
सिद्धान्तदर्पणमहो नितरां प्रसिद्धं यो ग्रन्थरत्नमतुलं प्रथयांबभूव ।
गोरण्ड[2]शासनमतः प्रतिभाविलासं प्रीत्या समार्च्चयदमुं बहुमानदं सत् ।।२
दृष्ट्वा स्वनेत्रयुगलेन गतिं ग्रहाणां पञ्चाङ्गशोधनविधौ यतमान एषः ।
नूत्नां प्रमाणसहितां नवपञ्जिकां स स्वप्रज्ञया बुधवरो रचयाञ्चकार ।।३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नीलाद्रिनाथचरणे नितरां हि भक्तिर्यस्याभवद्द्विजचये च गवां समूहे ।
आकर्ण्य भूसुरगणे परिभाववाणीं तत्याज राजपरिषत्प्रमुखं पुरा यः ।।४
रोगेण कर्षिततनुर्द्रविणेन शून्यो यन्निष्ठया तदकरोन्महनीयकार्यम् ।
नूनं चिराय भविता जनतोपकृत्यै आदर्शभूतमनुगच्छत भो बुधास्तम् ।।५

(ओडिशासंस्कृतएकाडेमीपक्षतः सामन्तचन्द्रशेखरजयन्तीसमारोहसभायां पूर्या ब्राह्मणबोर्डिपरिसरे पठितम् । सामन्तचन्द्रशेखरसिंहः उत्कलप्रदेशस्य नवदुर्ग (नयागड)मण्डले (जिल्लायां) खण्डपत्तन(खण्डपडा) क्षत्रियजातौ राजपरिवारे जनिं लेभे । स ज्योतिषे नदीष्ण आसीत् । 'सिद्धान्तदर्पणः' ग्रन्थः तेन विरचितः । महामहोपाध्यायोपाधिना भारतसर्वकारस्तं सम्मानितवान्। खण्डपडापत्तन (खण्डपडा) राजसभायां ख्रीष्टधर्मावलम्बी मधुसूदनदासः राज्ञा सम्माननाय निमन्त्रित आसीत् । स समेत्य सभायां ब्राह्मणानाक्षिप्य किञ्चिदवोचत् । येन महामहोपाध्यायश्चन्द्रशेखरः क्षुब्धः सभां तत्क्षणात्परित्यज्य प्रस्थितः । मधुबाबुरनन्तरं तद्गृहं गत्वा तन्मुखात् ब्राह्मणनिन्दा सभात्यागकारणं श्रुत्वा क्षमामयाचत ।)

१. जनुषा= जन्मना, २. गोरण्डः= ब्रिटिश्

—*—

हरिहरप्रशस्तिः

गीर्वाणवाणीपठनाय संस्थासंस्थापकेषूत्कलदेशभूमौ ।
विद्वद्वरेण्यः प्रथमो यतस्त्वं ततो नमामस्तव पादपद्मम् ।।१
यशोऽनपेक्ष्यात्मन एव सौख्यं निजं त्वया वा महनीयकीर्ते ।
कृतः प्रयासो नितरां कठोरश्चिराय स स्याद्विबुधैः प्रशस्यः ।।२
महोदधेः सैकततीरदेशे पुर्यां जगन्नाथपवित्रभूमौ ।
प्रतिष्ठिता संस्कृतपाठशाला नटीव रूपैर्विविधैश्चकास्ति ।।३
नामानि[१] तस्याः परिवर्तितानि तथापि तां तत्त्वविदो विदन्ति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सदुद्यमन्ते प्रणतेन मूर्ध्ना संशन्ति सर्वे विबुधाग्रगण्याः ।।४
भगीरथो भारतमानिनाय यथा तपोभिः कठिनैर्हि गङ्गाम् ।
प्रचेष्टया त्वं हि तथोत्कलेषु [२]प्रत्यष्ठिपःसंस्कृतपाठशालाम् ।।५
यावद्विभातो गगने रवीन्दू यावद्धरा पञ्चजनैश्च पूर्णा ।
चकास्तु तावत्तव कीर्तिरेषा कृपावशाच्छ्रीजगदीश्वरस्य ।।६
हरिहर प्रणतिस्तवपादयोरियमये क्रियते प्रतिगृह्यताम् ।
सुरगवीं प्रति चेतसि नः सदा भवतु गाढरतिर्भवदाशिषा ।।७

१. उत्कलेषु हरिहरदरदाशेन विदुषा प्रथमतः संस्कृतविद्यालयः स्थापितः। पुरीसंस्कृतकलेज्, सदाशिवसंस्कृतकलेज्, श्रीसदाशिवकेन्द्रीयसंस्कृत-विद्यापीठं, श्रीसदाशिवपरिसरः इत्येतैर्नामभिः तस्याः नाम्नः गृहादीनां च महत्परिवर्तनं कालक्रमेण जातम् ।
२. प्रत्यष्ठिपत्= प्रतिष्ठापितवान् (प्रत्युपसर्गपूर्वकात् स्थाधातोः णिचि लुङि प्रथमपुरुषैकवचने) ।

—*—

सुभाषस्मरणे

भासा सुभाषस्य सुभासितं जगन्न तादृशो नेतृवरोऽत्र भारते ।
[१]गोरण्डदुःशासनलोपवाञ्छया तेनाद्भुतं कर्म कृतं महात्मना।।१
अङ्के समासाद्य च तादृशं सुतं धन्या धरेयं खलु वीरसत्तमम् ।
कृत्यं च यद् योग्यसुतस्य तद्व्यधादसौ सुधीर्भारतभूकृते भृशम् ।।२
अधीतविद्यः कटकेऽभवत्पुरा लब्ध्वा जनिं बोषकुलेऽतिनिर्मले ।
परीभवं जन्मभुवोऽनुभूय यः कृतप्रयत्नस्तदपाकृतावभूत् ।।३
[२]पट्टाभिसीताभिधपक्षपातिनं यो मोहनं वीक्ष्य मनस्विपुङ्गवः ।
तृणं यथा मुञ्चति कश्चिदञ्जसा महासभाध्यक्षपदं व्यमुञ्चत ।।४
दैन्येन वा प्रार्थनया स्वतन्त्रता लभ्या कदाचिन्नहि केवलं बलात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राद्धान्तमेतं नरकेशरी स्वयं प्राचारयत्सर्वत एव नीवृति ।।५
संघट्य सर्वान् स्वमतानुयायिनः स जानकीनाथसुतो महामनाः ।
प्रारब्ध घोरं समरं दुराशयैर्मिताम्रशस्त्रोऽपि भयं परित्यजन् ।।६
यस्यैव साम्राज्यमवाप्य भानुमान् प्रयाति नास्तं सततं भयेन किम् ?
नाजीगणत्तन्महिमानमात्मवान् स्वतन्त्रतायै कृतगाढनिश्चयः ।।७
क्वासौ गतः किं कुरुतेऽधुनाथवा दिवं गतो वा नहि वेत्ति कश्चन ।
परं तदीयं चरितं महोज्ज्वलं चिराय नूनं जनता स्मरिष्यति ।।८

१. गोरण्डः = ब्रिटिश, २. पट्टाभिसीतारामायां कंग्रेसाध्यक्षपदप्रार्थिनं मोहनदासगान्ध्यभिमतं पराजितवान् । गान्धिमनोभावेन खिन्नोऽसौ पदं पर्यत्यजत् ।

—*—

गुरुस्मृतिपञ्चकम्

(१९९१ तमे खृष्टवर्षे गुरोः पण्डितकुलमणिमिश्रस्य प्रथमश्राद्धवर्षिकमुपलक्ष्य ।)

छात्रान् विधाय निपुणानुपदेशवर्यैरध्यापनैश्च सततं निजमन्दिरेऽपि ।
विद्वत्कुले कुलमणिः किल सार्थनामा जातो ह हा स हि गुरुः सुरलोकधामा ।।१
ज्ञानेन सार्धमपि यो द्रविणं प्रदाय साह्यं व्यधादनभिसन्धिरहो महात्मा ।
दीनाय छात्रनिवहाय सदा प्रसन्नः सोऽस्तंगतो गुरुवरो महनीयमूर्त्तिः ।।२
प्रत्यूष एत्य विधिवत्कृतनित्यकृत्यश्चित्वा सुमानि विविधानि विधाय माला ।
नीलाचलाधिपतये समदाच्च भक्त्या यः क्वाद्य धार्मिकवरः स गुरुर्गतो नः ।।३
बद्धादरो विविधशास्त्रविचारणेषु श्रद्धान्वितो विबुधवृन्दसमर्च्चनेषु ।
अद्धातिथिप्रियकरो मृदुलस्वभावः सद्धामगो यदि गुरुः स किमत्र चित्रम् ।।४
यन्मार्गदर्शनबलेन हि लब्धवन्तो विद्याव्ध्युपाधिमनिशं परिशील्य छात्राः ।
यद् वैदुषी सुविदिता स्मयवर्जिता च राष्ट्रेशवन्दितगुणाय नमोऽस्तु तस्मै ।।५
अकिञ्चनेनार्च्चितः सन् पद्यपुष्पैस्तु पञ्चभिः
दयालुः स्वरधिष्ठाय प्रयच्छत्वाशिषं शुभाम् ।।६

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्मृतितर्पणम्

(राष्ट्रपतिसम्मानितवेदान्ताध्यापकवैकुण्ठविहारिनन्दमुद्दिश्य लिखितम्)

यत्पार्थिवं तव वपुर्निहतं गदेन
तिष्ठेद्धि तावकयशोमयविग्रहो यः ।
नो जातु शक्ष्यति तदीयविनाशनाय
कालो ध्रुवं सुचिरमेव विधाय यत्नम् ।।१

गान्धर्वकाव्यकलयापि च जैमिनीयं
वेदान्तशास्त्रमधिगत्य बहुश्रमेण ।
अध्याप्य शिष्यनिवहान् खलु लब्धवर्णा
तुल्यास्त्वया सुविरला भुवि पण्डिता हि ।।२

कुण्ठालवोऽपि नहि तेऽत्र यतः सुविद्वन्
कुत्राप्यभूच्चविपये गुरवस्ततः किम् ?
वैकुण्ठनाम विहितं सुविविच्य सम्यक्
हा त्वां विना सुरगवी[1] नितरां हि खिन्ना ।।३

लोकप्रिया सुरगवी हि चिकीर्पिता प्राक्
सङ्गीतमाध्यममहो भवता व्यधायि ।
साफल्यमप्यधिगतं भृशमेव सत्यं
नास्तीह सम्प्रति बुधो भवतः सदृक्षः ।।४

वैकुण्ठे वैकुण्ठेन त्वं वैकुण्ठनन्द सत्तम ।
सुचिरं नन्द निर्द्वन्द्वमाशिपं च प्रयच्छ नः ।।५

---

१. सुरगवी = संस्कृतभापा ।

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रणतिं गृहाण

मुरलीधरपण्डिताग्रणीः परिहाय क्व गतो भवान्धराम् ।
विरहस्तव दुःसहो ह हा विधिना किं प्रतिपादितो हठात् ।।१
स्मितशोभिमुखाम्बुजञ्च ते स्मरतो वाचमथो सुधोपमाम् ।
नयनं सलिलेन संप्लुतं न भवेत्कस्य वदाधुना भृशम् ।।२
क्रमशः कृशतां विलोक्य किं सुरवाचो व्यथया भृशं भवान् ।
वदितुं त्रिदिवं गतो द्रुतं सकलं स्नेहमितो विहाय हा ।।३
परिवारगणेन संयुतस्तव शिष्यव्रज एत्य सर्वथा ।
भवदीयगुणान्स्मरन्मुहुः करुणं क्रन्दति पश्य साम्प्रतम् ।।४
परिबोधय तान् दयान्वितः परिखिन्नान् द्रुतमेत्य नाकतः ।
न कदापि विलोकितस्त्वयीदृशभावो भव नैव निर्दयः ।।५
परगर्हणतः पराङ्मुखो मृदुभाषी परिहासपेशलः ।
गुणलेशमहो परस्य यद्बहुलीकृत्य भवानभाषत ।।६
किमु विग्रहवान् भवानभूद्विनयः पण्डितमौलिमण्डन ।
सदृशस्तव कोऽपि दृक्पथं मम नायाति धरातलेऽखिले ।।७
सुचिरं त्रिदिवं विभूष्य वै क्रमशः सत्यपदं प्रतिष्ठताम् ।
भवदीयगुणावली च नो हृदयान्तर्भवतात्तवाशिषा ।।८

जित्वा समस्तहृदयं धरणौ गुणौघै-
र्यातो भवान्सुरपुरं किमु विश्रमार्थम् ?
सौम्येन[1] दैत्यगुरुणा[2]ङ्गिरसेन[3] साकं
मोदस्व सन्ततमये प्रणतिं गृहाण ।।९

---

१. सौम्येन= बुधेन, २. दैत्यगुरुणा=शुक्रेण, ३. अङ्गिरसेन=बृहस्पतिना ।

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राजीवगान्धिः

फिरोजशाहः सुभगः प्रगल्भो धीमानुदारोऽभवदुग्रतेजाः ।
तद्दारगर्भादजनिष्ट नेता राजीवगान्धिर्जनतानुरागी ॥१

फिरोजपुत्रोऽपि हि लोकमध्ये य ऐन्दिरेयः[१] परिकीर्त्यतेऽद्धा ।
मातुः प्रसिद्ध्या खलु इन्दिराया राजीवगान्धिर्नितरां प्रसिद्धः ॥२

जानन्ति सर्वे धृतराष्ट्रमित्थं विचित्रवीर्यात्मजमाम्बिकेयम् ।
राजीवगान्धिं हि फिरोजसूनुं तमैन्दिरेयं निगदन्ति लोकाः ॥३

विमानसञ्चालनसुप्रवीणो राष्ट्रप्रशास्तावपि नैजदाक्ष्यम् ।
प्रामाणयद्भारतमन्त्रिमुख्यो भूत्वातिमान्यः स फिरोजसूनुः ॥४

श्रद्धाह्यदभ्रा हृदि तस्य यस्माज्जनेषु शश्वज्जनताप्रियस्य ।
आसीत्ततो हा निहतो महात्मा राजीवगान्धिः कुटिलैः कुवृत्तैः ॥५

आदर्शकार्याणि कृतानि तेनानल्पानि नूनं खलु देशहेतोः ।
स्मरिष्यते ह्येष जनैश्चिराय राजीवगान्धिः समुदारचेताः ॥६

रूपेण सौरभ्यगुणेन यद्वद्राजीवपुष्पं[२] प्रियमिन्दिरायाः ।
प्रियोऽस्तु कीर्त्त्या सततं जनानां राजीवगान्धिः सुत इन्दिरायाः ॥७

---

१. ऐन्दिरेयः= इन्दिरापुत्रः, २. लक्ष्म्याः कमलं प्रियपुष्पम् ।

—*—

गृहीत यत्साधु

अयं प्रगल्भः[१] किमु जल्पतीति[२] भो नैवं मतिर्मे वचने विधीयताम्।
शुकस्य बालस्य वचोऽपि गृह्यते विचक्षणैस्तद्यदि वै सुसङ्गतम्॥१

तुषारमुष्णं मधुरं सरित्पतेः पयोऽथवा तीक्ष्णरसाञ्च शर्कराम् ।
शतं वदेयुर्यदि शीतलं जना वह्निं कदाचिन्नहि सम्भवेत्तथा ॥२

चौराः शठा ये व्यभिचारिणो जना गवाशना[३] वा नरघातका अपि।
काश्यां मृताश्चेदपवर्गमाप्नुयुः[४] किं क्लेशसाध्येन च पुण्यकर्मणा॥३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चौर्येण सम्पाद्य धनं सुपुष्कलं निपीय हालां[५] नितरां सुखप्रदाम्।
आस्वाद्य कौलं[६] पललं[७] सुकोमलं वाराङ्गनासङ्गमहर्निशं कुरु ।।४
अत्रास्ति चेद्भैरवयातनाधिका पापात्मनां का यमदण्डतो भिदा?
किं विश्वनाथो जगतोऽखिलस्य नो काश्या हि नाथोऽस्ति स केवलं पुनः ।।५
वैषम्यदोषान्वित ईश्वरो भवेत्साम्यं प्रणश्येत्किमु नैव सर्वथा ।
सुनिर्मले चेतसि पुण्यकर्मभिस्ततोऽपवर्गः खलु बोधतो नृणाम् ।।६
या काशिखण्डस्य कथा विचिन्त्यतां कथं सुरेभ्यो विमुखोऽभवन्नृपः ?
रिपुञ्जयो यो हि सुशासको महाँल्लोके दिवोदास इति प्रथां गतः ।।७
तपोरतं यं समुपेत्य सादरं जगाद धाता परितुष्टमानसः ।
अवग्रहेणापि[८] च दुष्टदस्युभिर्भुनक्तु[९] राजन्धरणीं प्रपीडिताम्।।८
यः प्रार्थितोऽभूत्परमेष्ठिना नृपो दूरीकृतास्तेन धरातलात्सुराः ।
विश्वेश्वरो मेरुमगात्ततः कथं स्मृत्वा स काशीं नितरामखिद्यत ।।९
कुवेरशापेन यथा स गुह्यकः प्रहीणशक्तिस्त्वलकामभीक्षितुम् ।
न्ययोजयद्दूततया घनं पुरा दिवाकरादीन्कथमम्बिकापतिः ।।१०
भ्रूभङ्गमात्रेण जनिं लयञ्च यः कर्तुं समर्थः भुवनावलेः पुनः ।
महेश्वरो यः परिकीर्त्यते सदा द्रष्टुं स काशीं किमु नाशकत्पुरा ।।११
आराध्य यं शङ्करमादिकारणं त्रिकालदृष्टिं लभतेतरां नरः ।
विहाय काशीं नितरां स खिद्यते हास्यास्पदं स्यात्किमतःपरं वद ।।१२
यथातिनीचो निजकार्यहेतवे परस्य हानिं कुरुतेऽविचारयन् ।
निःसारणार्थं नृपतेस्तथाकरोत्किं विश्वनाथः कपटं हि काशितः ।।१३
नैर्घृण्यमत्यन्तमहो[१०] इतः परं किं वा भवेच्चिन्तनमर्हति ध्रुवम्।
औचित्यमत्रास्ति कियच्च योगिनीगणं हरः प्रेरितवान्स काशिकाम्।।१४
प्रभ्रंशनार्थं यदि धर्ममार्गतो यतेत कश्चित्स कथं सदाशिवः ?
पूज्यश्च लोकेषु भवेत्ततो मृषा प्रकल्पितं धूर्तजनेन केनचित् ।।१५
शिवस्य शूलोपरि काशिरस्ति चेत्तथा ह्ययोध्या तु सुदर्शनोपरि।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महम्मदीयैर्नितरां विनाशिते ताभ्यां ततः किं यवना बलाधिकाः ।।१६
विनायका भैरवदण्डपाणयो यस्याश्च दुर्गाः परिरक्षणे रताः।
सा काशिकाद्धा[११] यवनैः सुदुर्मदैः प्रणाशिता ह्रा क्व गतास्तदा हि ते ।।१७
अनेकजन्मार्जितपापसंहतिर्गङ्गाम्भसि स्नानवशाद्भवेन्नृणाम् ।
सत्यं यदीदं वचनं ततोऽधुना नोदेति वोधो वद केन हेतुना।।१८
असङ्गतीनां निचयोऽस्ति यद्यपि श्रद्धा जडा ये त्वविशुद्धवुद्धयः।
विना विचारं नरकस्य भीतितो मुधा सुगाढं वत विश्वसन्ति ते ।।१९
कादम्वरी बाणकवेः कथा यथा प्रकल्पिता शिक्षणसंयुता रसैः ।
न तथ्यभूता परिगृह्यतां तथा पुराणवार्ता विबुधैर्हि संशिता ।।२०
य ऊर्ध्वपुण्ड्राङ्कितमस्तको भवेद्दानेन तस्मै सुकृतं प्रवर्द्धते ।[१२]
त्रिपुण्ड्रभालं यदि कश्चिदीक्षते प्रातः स गच्छेन्नरकं सुदारुणम् ।।२१
सङ्कीर्णता वञ्चकता च नीचता इतःपरं किं प्रविचिन्तयन्तु भोः ।
व्यासेन किं सर्वमिदं प्रकीर्तितं दुर्वृत्तवृन्देन न योजितं छलात् ।।२२
पुराणनामास्ति यदुच्यते श्रुतौ व्यासेन विस्तारितमेव तत्पुनः ।
सङ्कीर्णधीभिर्निजलक्ष्यसिद्धये सम्मेलितं तत्र भृशं न संशयः ।।२३
नद्यौ तु पूते वरणासिनामिके हरेर्मुदश्रुप्रभवे प्रकीर्तिते ।
तदम्बुपानाद्दुरितक्षयो भवेत्स्वर्गञ्च गच्छेदिति वर्णितं तदा ।।२४
कश्चित्पिवेत्सम्प्रति तज्जलं यदि स्थितिस्तदीया वद कीदृशी भवेत्।
अतः स्ववुद्ध्या प्रविचार्य यत्नतः कुर्याद्विपश्चिन्नहि मूढवत्क्वचित्।।२५
नाश्नाति पक्वं कदलीफलं यथा सवल्कलं[१३] जातु सुधीः सुखं परम्।
गृह्णाति तस्यैव सुधोपमं रसं तथा पुराणानि विविच्य यत्नतः ।।२६
[१४]वृहस्पतेर्भाषितमादराज्जनोऽवधाय सम्यक्कुरुते क्रियां यदि ।
प्राप्येह सौख्यं परलोकमङ्गलं विन्देत नूनं नहि तत्र संशयः ।।२७
नह्यन्धविश्वासवशात्समाचरन् कल्याणमासादयते जनः क्वचित् ।
इहास्तु लोकान्तरगोऽथवा पुनः श्रद्धा ततः स्यात्सुविचारपूर्विका ।।२८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न दर्पणे स्वं मुखमीक्षितुं क्षमा दृक्शक्तिहीना हि यथात्र सर्वथा ।
शास्त्रस्य तात्पर्यमशेषतस्तथावाप्तुं न शक्ताः खलु वालिशाः[१५] क्वचित् ।।२९
शास्त्रेषु यद्वर्णितमस्ति सर्वथा प्राज्ञः स्वबुद्ध्या प्रविचारयेत्तु तत् ।
सम्यक्तया युक्तियुतं न वा पुनर्भवेदधर्मो ह्यविचारकर्मतः ।।३०
दानं द्विजेभ्यो यजनं सुपर्वणां[१६] तीर्थाटनं वा गुरुषु समादरः ।
जपो मनूनामथ[१७] नामकीर्तनं जगत्पतेः स्यात्खलु पुण्यवर्धनम् ।।३१
शुश्रूषणं पीडितलोकसंहतेर्जितेन्द्रियत्वं नियमः क्षमा शमः ।
सत्यं दया दीनजनेषु सन्ततं प्रभूतपुण्यं जनयेज्जनस्य वै ।।३२
प्रज्ञाविहीना नहि वोद्धुमीशते श्रद्धाजडाः स्थूलधियो यथायथम् ।
शास्त्रस्य तात्पर्यमतो मया[१८] इवाङ्गीकुर्वते सर्वमशेषतो मुधा ।।३३
न कण्टकं नैव तुषं न वल्कलं न पल्लवं पश्यति वा क्रमेलकः[१९] ।
अश्नाति सर्वं हि यथा विमुग्धधीस्तथाखिलं सम्मनुते पुराणके ।।३४
हंसो यथापास्य जलं क्षीरं पिवेत्कुशाग्रवुद्ध्या प्रविविच्य पण्डितः ।
गृह्णीत यत्साधु तदेव केवलं कल्याणकृच्चात्मन एव सर्वथा ।।३६

---

१. प्रगल्भः= उद्धतः, गर्वी, २. जल्पति= निरर्थकं वदति, ३. गवाशनाः= गोमांसभक्षिणः, ४. अपवर्गं= मोक्षं, ५. हालां= मद्यम्, ६. कौलं= शूकरसम्बन्धि, ७. पललं मांसं, ८. अवग्रहेणापि= अनावृष्ट्या, ९. भुनक्तु= पालयतु, १०. नैर्घृण्य= निर्दयता, नृशंसता, ११. अद्धा= तत्त्वतः, १२. पद्मपुराणे इत्थं वर्णितम्, १३. बल्कलं= त्वचान्वितम् ।

१४. केवलं शास्त्रमाश्रित्य कर्त्तव्यो न विनिर्णयः ।
युक्तिहीनविचारे तु धर्महानिः प्रजायते ।।

१५. बालिशाः= मूर्खाः, १६. सुपर्वणां= देवानाम्, १७. मनूनां= मन्त्राणाम्, १८. मयाः= उष्ट्राः, १९. क्रमेलकः= उष्ट्रः ।

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विचिन्तनीयम्

विचारशक्त्यै ददतस्तिलाञ्जलिं बुधा यदि स्युस्त्वबुधा इवाधुना ।
वदानि किं वा कमपीह वेद्मि नो ततो हि मौनं श्रयणीयमञ्जसा[१] ॥१

विष्णुं हि तत्त्वं प्रवदन्ति वैष्णवाः शिवं हि शैवाः प्रमुखं मतद्वयम् ।
भजन्ति शाक्तास्त्वपरे च चण्डिकां रविञ्च सौराः गणपञ्च गाणपाः ॥२

वदन्ति रामं कथमत्र निस्त्रपास्तथैव कृष्णं हरितोऽधिकं पुनः ।
प्रचारयन्तो भुवि वैष्णवान् स्वकान् विचित्रमेषां स्थितिरत्र सर्वथा ॥३

बहूर्ध्वदेशे प्रविभाति शाश्वतं साकेतगोलोकयुगञ्च सर्वथा ।
वदन्ति वैकुण्ठपुरादहो इमे व्यासस्य नाम्ना विरचय्य पुस्तकान् ॥४

नाम्ना ऋषीणां निजकल्पनां शठाः प्रचारयन्तीह जनेषु निर्भयम् ।
श्रद्धां विना स्यान्नरकं सुदुस्तरं मुग्धेषु भीतिं जनयन्ति दुर्जनाः ॥५

शरीरकान्तिं नखचन्द्रिकामिमे ब्रह्मेति मूढाः कथयन्त्यसङ्गतम् ।
वेदापकर्षः किमतःपरं ततस्त्याज्या ध्रुवं मूढमतावलम्बिनः ॥६

न चेच्छ्रुतिर्वेदयितुं क्षमा तु तन्निगूढतत्त्वं कथमेभिरेव हि ।
यथार्थतो ज्ञातमिति प्रमा भवेन्न विद्महे मूढधियां विचेष्टितम् ॥७

इमे यदि ज्ञानिन एव सर्वथा किमस्ति मानं नहि तद्दिगम्बराः[२] ।
कणाद-कापालिक-[३]सौगतादिभिर्यदुक्तमङ्गीकरणं कथं न वा ॥८

या मातृवत्पूज्यत एव मातुली मूढैरपीहास्ति च तादृशं स्मृतौ ।
तया स रेमे कथमीदृशं वचः पापा विलिख्युः खलु विस्मयो महान् ॥९

या मातुली सा जननीव सर्वथा मान्येति विज्ञाः प्रविदन्ति तत्त्वतः ।
तया व्यवायः[४] सुमहद्धिपातकं मन्वादिभिः सङ्कथितं महर्षिभिः ॥१०

हा राधया सङ्गमवर्णनं रहः प्रेमेति कृष्णस्य वदन्ति निस्त्रपाः ।
का कल्पनेयं नितरां भयावहा चिरात्समाजे सुदृढं प्रचारिता ॥११

गुरोः [५]सपर्या च मखैः सुरार्च्चनं दानं द्विजेभ्योऽतिथिसेवनं तथा ।
गोसेवया साकमहो प्रचारयंश्चकार कृष्णः किमु पातकं महत् ॥१२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रेष्ठानुकारं[६] ह्यनुवर्त्ततेऽनिशं लोको यतोऽहं प्रकरोमि सर्वथा ।
धर्म्यं न चान्यत्, नहि किञ्चनास्त्यपि प्रयोजनं कर्मचयेन मामकम् ।।१३
[७]अवोधयत्प्राङ्निजभक्तमर्जुनं य एव रासे स कथं रमेत वा ?
गोपाङ्गनाभिः किमिहास्ति शिक्षणं जनस्य तस्मादनृतं हि कल्पनम् ।।१४
आनीतवान्मर्त्त्यभुवं सुरद्रुमं विजित्य युद्धेऽमरराजमेव यः ।
नापूजयद्द्वोः जनशिक्षणाय स प्रभासतीर्थे किमु सप्ततन्तुना[८] ।।१५
यत्पारदार्यं नितरां जुगुप्सितं शास्त्रेपु विज्ञैर्ऋषिभिः प्रकीर्तितम् ।
प्रचारितं किं किल रासलीलया तदेव कृष्णेन हहा विडम्वना ।।१६
प्रवञ्चना सासकृदेव भाषितं यत्सामवेदे ह्युदितं तथापि च ।
काण्वस्य शाखा कथिता कथेति वा मृषैव सर्वं प्रवदन्ति वैदिकाः ।।१७
पुराणनामाभ्युदितं श्रुतौ ततः कृष्णेन[९] चेत्तद्वहुधा कृतं पुरा ।
लोकोपकृत्यै कथमत्र सम्भवेत्परस्परं यद्वहुधा विरोधकृत् ।।१८
विलोक्य रामं नितरां मनोरमं भोगाभिलापोऽह्यभवत्पुरा किल ।
यद्दण्डके चेतसि हा तपस्विनां वाल्मीकिना तन्नहि कीर्तितं वचः ।।१९
योषासु पुंसां पुरुषेपु योषितां स्वभावतः स्यात्खलु रागसम्भवः ।
अप्राकृतं यन्नितरामसङ्गतं तज्जल्पितं मूढधियां सुमोहनम् ।।२०
किन्तेऽभवन्वा ऋषयोऽथवा पुनर्नपुंसका वा कथमन्यथा भवेत् ।
विकारभावः पुरुपस्य दर्शनाद्विवेचयन्तु प्रविहाय मुग्धताम् ।।२१
आप्तुं पतित्वेन कुमारिकागणः कृष्णं, समाराधयदम्विकां पुरा ।
समीक्ष्य वालं स्वमनोभवोद्भवो भवेत्कथं वा युवतीचयस्य भोः ।।२२
आभीरनार्य्यो नहि शैशवान्विता न वा जरत्यो निशि रासमण्डलम् ।
रिरंसया चेत्प्रययुर्ध्रुवं हि ता आसंस्तरुण्यो किमु संशयोऽत्र भोः ।।२३
लक्षत्रयं क्वापि च गोपिकागणं तथा सहस्राणि च षोडश ब्रुवन् ।
व्यामोहयेत्सत्यवतीसुतः कथं प्रवञ्चकानामिदमेव चेष्टितम् ।।२४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वृद्धैश्च बालैस्तरुणैश्च संयुता जनाः कियन्तोऽध्यवसंस्तदा पुनः ।
यद्गोकुलं वर्णितमस्ति वैष्णवैरतो मृषेदं प्रविचारयन्तु भोः ।।२५
आसीद्धि कृष्णो नहि तत्र संशयो विभूतयस्तेन च दर्शिता ध्रुवम् ।
न नीचकर्माणि कृतानि तेन प्राग्यथोच्यते वैष्णवमानिभिर्मृषा ।।२६
वाक्चातुरी या प्रवितन्यते मुधा सर्वं भवेत्कल्पभिदा सुसङ्गतम् ।
प्रवृत्तकल्पं प्रविहाय कारणं किं वर्णितं भोरितरस्य भाष्यताम् ।।२७
भवेन्न बोधो ह्यथवा गुरोर्मुखाद्यथाश्रुतं तत्कथयन्ति संसदि ।
विना विचारं नहि लभ्यते ध्रुवं तत्त्वं परं केवल[१०]कीरपाठतः ।।२८
सदेकतत्त्वं बहुधा प्रकीर्तितं श्रुतौ प्रसिद्धं न हि तत्र संशयः ।
उपास्यते चेदनिशं बुधैर्हि तत्सुश्रद्धया स्यादमृतत्व[११]मञ्जसा ।।२९
नामानि न स्युर्हि यथाक्षरं विना विश्वं च न स्यात्खलु तत्त्वमन्तरा ।
मृदं विना नैव यथा भवेद्घटो सृष्टिर्विना ब्रह्म न जातु वै तथा।।३०
[१२]नह्यस्ति वर्णो न भवेन्न यो मनुः शुक्रोक्तमेतत्स्मरणीयमेव हि ।
निरर्थकं वर्णचयं [१३]जपन्पुरा प्राचेतसोऽभूत्प्रथमः कविः क्षितौ ।।३१
यद्वैदिकं यच्च विचारसम्मतं स्मृतिष्वनिन्द्यञ्च समाजमङ्गलम् ।
तदेव चर्य्यं विबुधैरिहार्थये विचिन्तनीयं प्रविहाय मूढताम् ।।३२

---

१. अञ्जसा= शीघ्रं, यथावत्, २. दिगम्बराः= जैनाः, ३. सौगता= बौद्धाः, ४. व्यवायः= मैथुनम्, ५. सपर्य्या= पूजा, सेवा, ६. अनुकारं= अनुकरणम्, ७. अबूधयत्= बोधयति स्म, ८. सप्ततन्तुना= यज्ञेन, ९. कृष्णेन= व्यासेन, १०. कीरः= शुकः, ११. अमृतत्वं= मोक्षः, १२. अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्, १३. जपन्= जटाघोट इति जप्त्वा वाल्मीकिरभूदिति स्कन्दपुराणे ।

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवभाषितम्

काश्यामुषित्वा मम राजधान्यां यो देवमन्यं भजते मनुष्यः ।
त्यक्त्वा ममार्चां लभते न सिद्धिं जानीहि सत्यं गिरिजे ! स मूढः ।।१
जातो हि विष्णुर्मम वामभागात्तदंशभूतौ खलु रामकृष्णौ ।
मत्तोऽधिकौ तौ मनुते मनुष्यो मन्मायया मोहितचित्तवृत्तिः ।।२
मुमूर्षुकर्णे मम पुण्यमन्त्रं यन्निर्गुणं तारकमामनन्ति ।
ब्रुवे तदेवाचलराजकन्ये श्रद्धत्स्व मे वाचि न किञ्चिदन्यत् ।।३
सर्वाणि नामानि ममैव लोके सन्तीह सत्यं परमं प्रिये वै ।
ओंकारमाद्यं यतिवृन्दचिन्त्यं स्त्रीभिश्च शूद्रैर्नहि कीर्त्तनीयम् ।।४
शिवेति यद्द्व्यक्षरयुक्तनामाथवा महादेव इति प्रसिद्धम् ।
हरेति वा दुःखहरं जनानां तानीह वाच्यानि सदा समस्तैः ।।५
ममांशभूतं हनुमन्तमाहुः को वास्ति जीवो नहि यो ममांशः ।
उपाधियोगात्तवकप्रभावाज्जानन्ति मूढा नहि तत्त्वमेतत् ।।६
भोगञ्च मोक्षञ्च ददानमाद्यं विहाय मां देवगणार्च्चितांघ्रिम् ।
अनाद्यनन्तं शिवमद्वितीयं मूढा भजन्त्यन्यसुरान् हि लोके ।।७
आराध्य भक्त्या कमलैरनेकैर्नीतं मयैकं त्वविदन्हि विष्णुः ।
अदात्स्वनेत्रं मम पादयोर्यत्, सुदर्शनं तन्मयका प्रदत्तम् ।।८
आराध्य मां सा कमला कदाचित् पत्युः प्रियत्वं समवाप्तुकामा ।
छित्त्वार्पयद्यत्कमलस्य पूर्त्यै स्तनं स्वकीयं हि तदेव विल्वम् ।।९
प्रियं ततो मेऽस्ति हि विल्ववृक्षः पत्रं तदीयञ्च फलं सुकेशि ।
दलं फलं वा यदि तस्य कश्चिद्ददाति मह्यं स भृशं सुखी स्यात् ।।१०
न तत्त्वतो यद्यपि भेदलेशः सत्यं, परन्तु लोके व्यवहारदृष्ट्या ।
स्थितेऽपि तस्मिन्नहि निन्दनीयः शैवेन विष्णुर्मम भक्त इष्टः ।।११
गृह्णन्ति ये नाऽल्पधियो मदीयं निर्माल्यमद्रीशसुते च भक्त्या ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निन्दन्ति वा ते नरकं प्रयान्ति ध्रुवं धरायां सुचिरं नताङ्गि ।।१२
निर्माप्य धात्राखिलविश्वमेतद्विष्णुर्मया पालयितुं प्रदिष्टः ।
नानावतारैर्निजकृत्यजातं कुर्वन्ममासौ भवति प्रियोऽतः ।।१३
सम्पूज्य विष्णुं मम भक्तमादौ पूजा मदीया परमेव कार्या ।
तेनैव तुष्याम्यहमेव सत्यं न चान्यथा शैलसुते कदाचित् ।।१४
वैकुण्ठनाथं नहि पूजयित्वा ये केवलं मां किल पूजयन्ति ।
प्रीणामि तस्मिन्नहि जातु काश्यां प्रेष्ठो मदीयो यत एव विष्णुः ।।१५
विष्णुं न निन्देन्मम भक्तियुक्तो यतो ममासौ प्रियभक्त एव ।
सोऽपि न सोढा मम निन्दनं वै जानीहि सत्यं वचनं मदीयम् ।।१६
अवैदिकं कापिलसांख्ययोगान्मां तामसं केचन सङ्गीरन्ते ।
न तत्प्रमाणं प्रविदन्ति विज्ञा रज्यन्ति तस्मिन् खलु ये हि मूढाः ।।१७
आद्यं पुराणं यदभूत्पुरा वै विभक्तमष्टादशधा तदेव ।
व्यासेन सत्यन्तु तदीयनाम्ना धूर्तैर्यथेच्छं परिवर्तितानि ।।१८
सूतः प्रसिद्धोऽस्ति पुराणवक्ता शृण्वन्ति सर्वे ऋषयः सहर्षम् ।
पृच्छन्ति मूढा इव ते कथं वा प्रश्नांस्तु तान् वै सकलेषु तेषु ।।१९
तथोत्तराणीह न संवदन्ति प्रश्नेषु तुल्येष्वपि कस्य हेतोः ।
नैकेन तस्माल्लिखितानि तानि प्रज्ञानवन्तः प्रविदन्ति सर्वे ।।२०
जानन्ति विज्ञाः सकला जगत्यां वेदान्तसूत्राण्यखिलानि यानि ।
चर्च्चा गुणानां नहि तत्र काचित्पाराशरेणारचितानि तानि ।।२१
पुराणशास्त्रेषु तथाधिगीतं चर्चा गुणानां बहुला कृतास्ति ।
विज्ञायते तेन न कश्चिदेकः कर्ता समेषामिति धीधनौघैः ।।२२
सत्त्वं रजश्चैव तथा तमश्च वेदेषु नैषां खलु नाम गन्धः ।
बोधस्य सौकर्यकृते जनानामुक्तानि तानीह बुधैरनेकैः ।।२३
तेष्वेव कृत्वा यदि मानबुद्धिं यतेत कश्चिद्वद कस्य दोषः ।
विहाय वेदान्तमतं प्रसन्नं सीदेत्स दुःखैर्नहि संशयोऽत्र ।।२४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदान्तविज्ञानविशुद्धवुद्धिं ज्ञानाय तस्माद्गुरुमाश्रयेत ।
विचारयेच्चापि चिरं श्रुतं यत्ततो लभेतात्मसुखं शुभाङ्गि ।।२५
रागोऽस्ति यावद्विषयेषु लोके मोक्षप्रसङ्गः न भवेन्नराणाम् ।
ज्ञानेन वैराग्यमतो विधेयं निजस्वरूपं तत एव ज्ञेयम् ।।२६
कामादयो ये रिपवो जनानामज्ञानमेषां हि परं निदानम् ।
कार्यो निरासः सुधिया प्रयत्नाच्छ्रुत्या च युक्त्या सुविचार्य तस्मात् ।।२७
शतेन यत्नैर्न घनान्धकारो विना प्रकाशं भवनादपैति ।
ऋते न वोधाच्च भवेत्प्रणाशो माया कदाचित्खलु मानुषाणाम् ।।२८
विधाय वर्णाश्रमकृत्यजातं विहाय काम्यं खलु चित्तशुद्ध्यै ।
उपास्य मां ज्ञानदमच्युतं वा, वेदान्तवाक्यानि विचारयेज्ज्ञः ।।२९
शान्तस्तितिक्षुः कृतकृत्यजातो विविक्तसेवी श्रुतिशीर्षनिष्ठः ।
विचारवान् यो मम भक्तियुक्तोऽचिरेण ज्ञानं लभते मनुष्यः ।।३०
काश्यां द्विजेनोत्कलदेशजेन स्वर्गापगातीरमधिष्ठितेन ।
लक्ष्मीधरेणेश्वरकिङ्करेण मतं स्वकीयं लिखितं विमुक्त्यै ।।३१

—*—

दुराग्रहो नैव शुभङ्करो भवेत्

किमित्यपास्याभरणानि यौवने धृतं कषायं वसनं सुशोभने ।
न साम्प्रतं[1] सम्प्रति ते कदाप्यहो यद्युज्यते वार्द्धक एव सर्वथा ।।१
मुमुक्षुताया नहि लेशतोऽपि ते संलक्ष्यते चेतसि भावना मया ।
नैवास्ति सन्न्यासविधिः श्रुतेः स्त्रियां विशेषतो यौवत[2] ईदृशि ध्रुवम् ।।२
योग्येन पत्या सुचिरं पतिव्रताव्रतं यथावत्परिपाल्य यत्नतः ।
रमस्व कल्याणि शिवं च पार्वतीमाराधयालं[3] तव तेन मङ्गलम् ।।३
उत्पाद्यपुत्रांस्तनयाश्च तान्पुनर्विधाय योग्यान्विनिवेश्य वेश्मनः ।
भरं सुते चापि सुतां प्रदाय [4]द्राग्वराय योग्याय भजस्व शङ्करम् ।।४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कषायवस्त्रं न मनाग्घि कारणं न काशिवासः प्रभवेद्विमुक्तये ।
गङ्गावगाहो[५] यदि मानसं हहा भोगेषु सक्तं सकलं वृथाम्ब ते ।।५
निरुध्य चित्तं यदि शङ्करे रतिं स्थितोऽपि दूरे कुरुतेऽत्र मानवः ।
स एव मुक्तिं लभते न संशयो न काशिवासी जनवञ्चको ध्रुवम् ।।६
यदीयचित्ते प्रबलास्ति वासना भोगाय लोके बहिरन्यथा पुनः ।
प्रदर्श्यते तेन च लभ्यते कथं पापात्मना पण्डितमानिनामृतम् ।।७
सद्वस्त्रयोगात्पतनं यतेरपि प्रकीर्तितं यन्मुनिभिः परं हहा ।
सुवर्णभूषाभिरलं विभूष्य धिक्कश्चिन्न जिह्वेति[६] कथं स मस्करी[७] ।।८
विदेहभावो यदि तस्य विद्यते तथापि लोकस्य कृते हि साम्प्रतम् ।
नैतत्कदाचित्किल कृष्णभाषितं रणाङ्गने पार्थमये न वेत्ति कः ?।।९
स्पृशेद्यतिर्नैव कदापि योषितं, स्वमातरं प्राक् कपिलोऽप्यभाषत ।
संसेवयन्त्यात्मवपुर्यतिब्रुवाः कथं युवत्येति न बुध्यतेऽञ्जसा ।।१०
सुराङ्गनाश्लिष्टतनुः शुकः पुरा विकारभावं न मनागलब्ध यत् ।
तेनैव तुल्याः किमु सन्ति सर्वथा धूर्त्ता इमे चिन्तय लोललोचने ।।११
'त्रिनेत्रशून्योऽपि स शङ्करोमुनिर्दोर्भिश्चतुर्भी रहितोऽपि केशवः ।
एकाननः सन्नपि पङ्कजासनस्तस्याभवद्देहमतिः परे च के ?।।१२
ज्ञानेन हीनास्तपसा विवर्जिता वैराग्यशून्या विषयाभिकाङ्क्षिणः ।
आचार्यपीठं त्वधिरुह्य केऽप्यहो दृप्यन्ति[८] वित्तैः प्रचुरैश्च भोगतः।।१३
हरेर्हराच्चापि हिरण्यगर्भतः सम्भावयन्तः स्वमिमेऽधिकं वृथा ।
स्वचाटुकारैः परितः प्रचार्य ते व्यामोहयन्ति श्रुतवर्जिताञ्जनान् ।।१४
कथं हि मुग्धे त्वमिहागतासि हा प्रवञ्चिता धूर्त्तवचःप्रभाविता ।
स्वर्गो न मोक्षो भविता ध्रुवं तव प्रयाहि गेहं परिहाय वञ्चकम् ।।१५
यः शास्त्रमार्गं परिमुच्य कामतः करोति कार्यं न स विन्दतेऽमृतम् ।
[१०]सिद्धिं सुखं वा किमपीत्यभाषत कृष्णोऽर्जुनं प्राक्समराङ्गने स्वयम्।।१६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्याधिकारोऽस्ति हि वेदकर्मसु स एव सन्न्यासविधौ समर्हति ।
शिरो विना सम्भवतीह किं व्यथा किं सन्न्यसेद्यस्य न चाधिकारिता ।।१७
किं भोजनं पानमये गतिं स्थितिं श्वासक्रियां वा स्वपनं त्यजेज्जनः ?
तेनास्ति सन्न्यासविधिर्न च स्त्रिया विशेषतो या न विवाहसंस्कृता ।।१८
जरत्कुमारी[११] तपसा समुत्सुका स्वर्गाय वृद्धश्रवसा[१२] निवारिता ।
सा गौतमी प्राक् पुनरेत्य संस्कृता लेभे स्वकामं गदितं हि भारते।।१९
वरः कनीयान्नवयौवनान्वितः कन्या परं सा जरसाभिसंप्लुता ।
दृष्टान्तमेकं त्वपरं नहि क्वचित् द्वैपायनः कीर्त्तितवान् हि भारते ।।२०
विविच्य सम्यङ्मनसा शुचिस्मिते येनास्ति भद्रं तव तत्समाचर ।
कदाचिदत्रास्तु परत्र वा ध्रुवं दुराग्रहो नैव शुभङ्करो भवेत् ।।२१

---

१. साम्प्रतं= उचितम्, २. यौवते= युवतिगणे, ३. अलं= यथेष्टम्, ४. द्राक्= शीघ्रं, ५. गङ्गावगाहो= गङ्गास्नानम्, ६. जिह्रेति= लज्जते, ७. मस्करी= सन्न्यासी,

८. व्यासः अचतुर्वदनो व्रह्मा द्विवाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान् वादरायणः ।।

९. दृप्यन्ति = गर्वं कुर्वन्ति ।

१०. यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ।।(गीता ७/२३)

११. जरत्कुमारी= अविवाहिता वृद्धा । महाभारते शल्यपर्वणः ५२ तमाध्याये शृङ्गवान् कुणिवर्गकन्यां वृद्धां व्यवहत् इति द्रष्टव्यम् ।

१२. वृद्धश्रवसा= इन्द्रेण

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुर्याद्धि काव्यं सततं सदाश्रयम्

कवीयमानाः खलु सन्ति सम्प्रति प्रति प्रदेशं कति को वदेत्कथम् ?
अर्थं न वृत्तं गणयन्ति तेऽवमा वमन्ति काव्यानि यदृच्छया भृशम् ।।१
न रूपदृष्टिर्न च लिङ्गधारणा न कारकं वा न विदन्ति तद्धितम् ।
कुतः समासान् कविता वितन्यते, कपीयमानैरपि तैर्भृशं तु धिक् ।।२
पुरातना ये कवयोऽतिसुन्दरं व्यरीरचन् काव्यचयं न दृक्पथम् ।
कृतं कदाचिन्नहि वृत्तधारणा क्व जातिचिन्ता कुह रीतिरुत्तमा ।।३
विचिन्त्य किञ्चिद्विलिखन्ति निर्भरं सुसङ्गतं वास्तु न वा ह हा वृथा।
कुर्वन्ति मूढाश्च परं विकुर्वते वाणीं मुधा हा किल [१]कीशचेष्टया ।।४
रसानुभूत्या सममेव शिक्षणं साहित्यलक्ष्यं प्रवदन्ति कोविदाः ।
रसो न यत्रास्ति च नैव शिक्षणं किं तद्भवेज्ज्ञाः प्रविचारयन्तु ते।।५
न वर्णधर्माचरणं प्रतीक्ष्यते संस्कारनाम्नातिविनिन्दिता कथा ।
प्रचार्यते हा सह नीचकन्यया द्विजस्य यूनः प्रणयस्य वर्णनम् ।।६
यो नायकाभास इतीरितं पुरा नीचो युवा हा भवतीह नायकः ।
कुलीनकन्यापि सुशिक्षिता सती तस्मिन् समासक्तमनाश्च नायिका ।।७
गर्ह्योऽस्ति शास्त्रे प्रतिलोमसङ्करः स एव लोके प्रचुरं प्रचार्यते।
शास्त्रानभिज्ञैरधुना कविब्रुवैर्मनाग् विरोधं न करोति कश्चन ।।८
अभ्यर्हितत्वं नहि तत्र संशयो रसेषु सर्वेषु [२]शुचेरुरीकृतम् ।
स चेद्रसाभास इतीह वर्ण्यते विगर्हणीयो हि सदा सदात्मभिः ।।९
पुत्र्यां पिता चेदथवा स्वसाग्रजेऽनुरज्यतीति प्रवदञ्जनः सदा ।
उद्वेजकत्वाल्लभते स गर्हणां यथातिनिन्द्यः स तथा सुदुर्मतिः ।।१०
छन्दो विचित्यां खलु पिङ्गलादिभिश्छन्दांसि हृद्यानि च कीर्तितानि प्राक् ।
विहाय पाश्चात्यपदानुयायिनस्तानीह किं हा विबुधाः प्रकुर्वते ।।११
गुणान्वितां रूपवतीं सुवंशजां, सतीं परित्यज्य पतिर्यदि क्वचित् ।
हीनान्वयायां हतमानसो भवेद् यथाधमोऽसौ हि तथा कविर्भवेत् ।।१२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समुन्नतां गौरवशालिनीं चिरात् परम्परां भारतवर्षसम्भवाम् ।
त्यक्त्वा मुधा किं विपरीतवृत्तयः कुर्वन्ति पाश्चात्त्यपदाङ्कधावनम् ।।१३
यः पश्यति क्रान्तमसौ कविर्ध्रुवं प्रजापतिः सोऽपि मनीषिपुङ्गवः ।
श्रुत्युक्तमेतत्सुविविच्य सत्कविः कुर्याद्धि काव्यं सततं सदाश्रयम्।।१४
अतः समाधाय मनः सुनिर्मलं कल्प्यं हि वृत्तं नितरां मनोहरम् ।
निर्माय काव्यं युवकान् सदा बुधाः प्रचालयन्तां पथि धर्मसम्मते ।।१५

१. कीशः= मर्कटः, २. शुचेः= शृङ्गारस्य ।

—*—

विधुरविलापः

प्रियां परासुं पुरतो निरीक्ष्य धृतिच्युतः कश्चन मन्दभाग्यः ।
तस्याः स्मरन् सद्गुणराशिमाशु व्यथाभितप्तो व्यलपत्प्रकामम् ।।१
न त्वां विना कामपि कामयेऽहं स्वप्नेऽपि सत्यं नवनीतदेहे ।
मुधा कथं कुप्यसि मह्यमेवं विमुच्य मौनं मधुरं लपाशु ।।२
त्वया न भुक्तं मम भोजनात्प्राक् न चापि सुप्तं स्वपनात्कदाचित् ।
तिष्ठामि मर्त्ये कथमद्य नाकं प्रतिष्ठसे पूर्वमहो विचित्रम् ।।३
उपस्करैर्भूषयितुं गृहाणि प्रोक्तस्त्वयाहं ननु पूर्वघस्त्रे ।
पाञ्चालिकावत्किल भूमिभागे शेषेऽद्य निःसंज्ञतया वतेह ।।४
विवाहरात्रौ शुभकङ्कणाभ्यामम्भोजनेत्रे करयुग्मकं यत् ।
मया सहर्षं परिभूषितं प्राग् दुःखेन हा तत्परिभूषयामि ।।५
सिन्दूररेखा तव सारसाक्षि सीमन्तदेशे मयका व्यधायि ।
प्रीतेन पूर्वं परमद्य हात्र श्मशानभूमावतिदुःखितेन ।।६
अवाप्य यन्नेत्रयुगस्य सङ्गं कालाञ्जनं भूषणतां प्रयाति ।
वताद्यपूर्वं किल मृत्युना तद् विकारयुक्तं नितरां कृतं हा ।।७
त्वत्पादयुग्मन्तु मया कदाचिन्न लाक्षया रञ्जितमेव पूर्वम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अधर्मवुद्ध्या न ममावकाशस्त्वया प्रदत्तो रहसि प्रिये हा ।।८
श्मशानभूमौ शववाहकानां समक्षमेषोऽस्मि तवाघङ्घ्रियुग्मम् ।
लाक्षारसेनैव हि रञ्जयामि ह्रिया कथं तन्नहि कर्षसीह ।।९
सुवासतैलान्वितकुन्तलानां प्रसाधनार्थं नहि पारयामि ।
शयात्स्खलित्वा मम कङ्कतीयं भूमौ पतन्ती खलु दुःखिता किम् ।।१०
शशाङ्कवत्कोमलतूलतल्पेऽस्वपः पुरा त्वं मृदुलाङ्गि नित्यम् ।
संवेशनामोदमवाप्तुकामा शयिष्यसे हा कथमद्य चित्याम् ।।११
व्रतोपवासानकरोः पुरा त्वं येषां कृते तान् परिहाय पुत्रान् ।
कन्यां च लोकान्तरदर्शनेच्छा कथं तवाभूत् प्रवला विचित्रम् ।।१२
सख्यस्त्वदीया नवविप्रयोगादत्यन्तदुःखाभिभवाद्रुदन्त्यः ।
प्रकम्पयन्त्यो गगनान्तरालं कथं त्वया न प्रतिबोधनीयाः ।।१३
संसाररङ्गेऽभिनयं समाप्यागमस्त्वमाशु प्रथमं हि भद्रे ।
यास्यामि पश्चादहमेव यस्मान्नायं नयोनूतन एव कश्चित् ।।१४
तवानुरूपो न पतिर्भवामि ध्रुवं ततोऽगाः परिहाय हा माम् ।
सोढं भृशं मत्कृत एव दुःखं भद्रं भवेत्ते भव सौख्ययुक्ता ।।१५
दिवं प्रयाहि त्रिदिवाङ्गनाभिर्मन्दाकिनीरोधसि चारुगात्रि ।
मन्दारमालापरिशोभिताङ्गी नन्दानिशं नन्दनकानने त्वम् ।।१६
रूपश्रिया निन्दितदेवबाला बलारिवासं परिभूषयन्ती ।
पुलोमजासख्यसुखं चिराय प्राप्य द्रुतं प्रस्मर सर्वदुःखम् ।।१७
निपीय पीयूषरसं रसेन प्रमोदमाना सुमनोऽबलाभिः ।
रमस्व शश्वत्सुरदीर्घिकाया हेमाब्जकिञ्जल्कजलं विगाह्य ।।१८
पतिं लभस्वातिसुयोग्यमन्यं मोदस्व जन्मान्तर एव कामं ।
ममास्तु योगः खलु चित्तवृत्तेर्नित्ये परं ब्रह्मणि शीघ्रमेव ।।१९
अथादिदेवं भववन्धमुक्त्यै वद्धाञ्जलिः प्रार्थयतातिनम्रः ।
विना न तेनास्त्यपरः प्रपञ्चे दुःखापनुत्यै यत एव कश्चित् ।।२०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इदं तवेष्टं भगवन् यदि स्यान्मदीयदुर्दैवफलं भवेद्वा ।
तत्तुं विपद्वारिधिमेतमाशु प्रयच्छ धैर्यप्लवमेव मह्यम् ।।२१
प्राणानमुञ्चन्मम सम्मुखे या सन्दह्यते मत्पुरतस्तथापि ।
प्रत्येमि तां नोपरतां कदाचिन्मायाप्रभावः सुमहांस्तवाहो ।।२२
मन्मानसे हे भगवन् दयालो भूयादभीक्ष्णं स्मरणं त्वदीयम् ।
भोगाभिलाषो भवताद्विनष्टो लयोऽस्तु मे त्वच्चरणारविन्दे ।।२३

—*—

हे शङ्कर ! त्वं पुनरेहि

न स्वात्ममुक्त्यै न च बोधहेतोर्महत्तपःसाध्यत एतदेव ।
सुमृष्टभोज्यस्य च दक्षिणायाः कृते किमेते यतयश्चरन्ति ।।१
प्रचण्डसूर्यस्य करैर्महोग्रैः सन्तापितायां धरणौ भ्रमन्ति ।
अहो धनार्थं न च मुक्तिहेतोर्विचित्रलीलेयमये कले ते ।।२
नखम्पचायां धरणौ भ्रमन्तो न क्षुन्निवृत्त्यै द्रविणस्य वाप्त्यै ।
न ज्ञानिनो नैव च भक्तिमन्तो ह्येते वराकाः किल शोचनीयाः ।।३
शुल्कं विना यानमधिश्रयन्तो धूमस्य गच्छन्ति सुदूरदेशान् ।
नेपथ्यमात्रं किल धारयन्तः सतां तु भक्तिर्न च बोध एषाम् ।।४
अशिक्षितांस्तां सरलस्वभावान् जनान्मुधा हा परिवञ्चयन्ति ।
महात्मवुद्ध्या प्रचुरं हि वित्तं सुमृष्टखाद्येन समं लभन्ते ।।५
प्रयान्ति मूढास्तु गृहं स्वकीयं तीर्थस्य नाम्नार्पयितुं हि वित्तम् ।
यत्सञ्चितं याचनकर्मणा प्राक् पुत्राय पत्न्यायथवा[१] परस्मै ।।६
विक्रीणते दण्डमथापि सूत्रं ग्रथ्नन्ति मालाञ्च धनाप्तिहेतोः ।
पक्त्वापि खाद्यं स्वयमेव केचित् खादन्ति यच्छास्त्रविरुद्धमद्धा ।
वैदेशिकान् म्लेच्छगणांश्च वित्तं याचन्त एते च करं प्रसार्य ।।७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बम्भ्रम्यमाणाः प्रलपन्त एव जपन्ति माला जनवञ्चनार्थम् ।
मोक्षप्रसङ्गः सुदूरं प्रयातु ध्रुवं व्रजेयुर्नरकं वराकाः ॥८
उपेक्ष्यमाणास्तनयैर्वधूभिरायान्ति पूर्त्यायुदरस्य केचित् ।
श्रीशारदानुग्रहवञ्चिताश्चायान्त्यत्र वार्द्धक्यवशात्परेऽपि ॥९
मृतं कलत्रं प्रचुरं न वित्तं ततो न दारान्तरवाप्तियोगः ।
काषायचेलं परिधाय तस्मात् प्रच्छन्नकामाः प्रचरन्ति केचित् ॥१०
सप्ताष्टपुत्रा जनकस्य यस्मात् पर्याप्तवित्तं नहि जीवनार्थम् ।
विद्यापि नास्ति प्रविहाय गेहं तस्माच्चतुर्थाश्रममाश्रयन्ते ॥११
न व्याकृतिर्नैव च धर्मशास्त्रं न्यायस्य वार्ता सुदूरं प्रयातु ।
वैयासकीयं न च जैमिनीयं स्वप्नेऽपि यैराकलितं कदाचित् ॥१२
गीतानि भाषारचितानि तारं गायन्ति मूढाः शुकवद्रटित्वा ।
स्वं स्वं महाज्ञानिनमेत एव वैधेयका हा परिचिन्तयन्ति ॥१३
हलेन भूमिं परिकर्षयन्तो वने लुलापानपि चारयन्तः ।
सन्न्यासदीक्षां परिगृह्य मन्दाः कुर्वन्तु किं वा परमात्मबोधम् ॥१४
आचार्यवर्य्येण हि शङ्करेण प्रतिष्ठितेष्वेव मठेषु केचित् ।
श्रीशङ्कराचार्य इति ब्रुवन्त्यात्मानं मठेशाः किल मानहेतोः ॥१५
न वाक्यमेकं प्रभवन्ति वक्तुं गीर्वाणवाण्यापि च नैव भाष्यम् ।
वोद्धुं समर्था जगतो गुरुं स्वं वक्तुं त्रपन्ते न मनागपीह ॥१६
'अविद्यायामन्तरे वर्तमाना' इत्यादि यन्मुण्डकमाह मन्त्रम् ।
प्रकुर्वतेऽन्वर्थकमेत एव कलेः प्रभावात्तदिहाधुना हा ॥१७
श्रीशङ्कराचार्यपवित्रनाम्ना प्रवञ्चयन्तो जनतां विमुग्धाम् ।
भोगेषु सक्ताः क्षपयन्ति कालं क्व वा तपस्या क्व समाधियोगः ॥१८
स्पर्द्धन्त एते सुखभोगहेतोर्दुर्वृत्तलोकान् शरणं व्रजन्ति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तैः पीडयन्तः स्वविपक्षलोकान्मोमुद्यमानाः प्रकचन्त्यभीक्ष्णम् ।।१९
तथापि मुग्धा जनतातिमौग्ध्यादेतानहो धर्मगुरून् वदन्ती ।
प्रणम्य भक्त्या प्रचुरं हि वित्तं दत्त्वा विधत्ते जयघोषमुच्चैः ।।२०
हे शङ्कर त्वं पुनरेहि पश्याधुनास्य देशस्य दशां दुरन्ताम् ।
अमार्गगान् बोधय तूर्णमेतान् नोचेत् प्रणेश्येत् खलु वेदधर्मः ।।२१

१. पत्न्यै+अथवा = पत्न्यायथवा

—*—

स कथं महात्मा ?

यस्यास्ति चित्ते विषयेषु रागो द्वेषश्च नित्यं स कथं महात्मा ?
न मुण्डनेनापि जटाकलापैर्न भस्मना वा तिलकेन किञ्चित् ।।१
पीतं कषायं त्वथवास्तु शुभ्रं वस्त्रं वसित्वा नहि कोऽपि लाभः ।
शमो दमो वा यदि नास्ति लोके प्रवञ्चनेयं महती जनानाम् ।।२
विद्ध्वा ध्वजाग्रं परिदर्शयन्तः स्वमेव केचिद्धनसंग्रहार्थम् ।
प्रवञ्चकास्ते नहि तत्र लेशो यमस्य मूढाः खलु ताडनीयाः ।।३
किमूर्ध्वपुण्ड्रेण जटाकलापैः किं लुञ्चनैर्वा किमु भस्मना वा ?
सुगन्धिजातैः परिरञ्जितानां रागो विरागो ननु चिन्तनीयः ।।४
क्वचित्कदाचिद्विरलो महात्मा भवेत्प्रतिपिध्यत एव तन्नो ।
परन्तु सर्वत्र हि वञ्चकानां महान्प्रभावः परिलक्ष्यते हा ।।५
प्रीतिर्यदीया हरिणाङ्गनायाः तयाधिशय्यं सममेव शेते ।
नमन्ति लोका यतिमुख्यमुक्त्वा तमेव हा किं प्रवदाम धिक् धिक् ।।६
ब्रह्मास्ति सर्वत्र हि सत्यमेतद् यानिन्द्रियार्था इति सङ्गिरन्ते ।
अध्यस्यते यज्जगदेतदेव तस्मिन् सदाज्ञैर्भ्रमतश्चिराय ।।७
नोदेति यावद्धृदि तत्त्वमेतद्दाढर्यं न तावत्प्रविविच्य धीरः ।
सदा चरेच्छास्त्रमतानुसारं निन्द्योऽन्यथा स्याद्भुवनेऽखिलेऽस्मिन् ।।८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देहात्मबोधो यदि वा विलुप्तस्तथापि लोकस्य हि शिक्षणाय ।
नित्यं चरेल्लौकिकधर्मजातं प्रमाणयंच्छिष्टगणान् सुधीन्द्रः ।।९
वदाम कं किं युगधर्म एष प्रवञ्चना नृत्यति यत्र तत्र ।
किं राजनीतौ किमु धर्मनीता अर्थश्च कामश्च चकास्ति गाढम् ।।१०
करोतु किं वा जनतातिमुग्धा ददाति वित्तेन समं स्वचित्तम् ।
स्वर्गस्य मोक्षस्य कृते वराकी हृष्यन्ति धूर्त्तास्तत एव नित्यम् ।।११
यद्यप्यशिक्षात्र महन्निदानं केचित्पठित्वाप्यविचार्य सम्यक् ।
एतेषु हा श्रद्दधतेऽतिरेकं गड्डालिकारीतिमुपाश्रयन्तः ।।१२

—*—

किमितोऽस्ति चित्रम् ?

वैराग्यगन्धोऽपि हि नास्ति येषां भोगेषु चित्तं सततं प्रसक्तम्।
शैत्योष्ण्यशून्ये सुखदे गृहे च नित्यं रमन्ते गुरवस्त एते ।।१
भ्रमन्ति वित्तार्थमहर्निशं ये रामायणं भागवतं वदन्तः ।
सभासु संगृह्य धनं प्रकामं विज्ञानहीना गुरवस्त एते ।।२
अट्टालिकायां सुमनोहरायां सुधाशिलाच्छादितकुट्टिमायाम् ।
महार्हशय्यास्तरणाञ्चितेषु तल्पेषु संवेशसुखं लभन्ते ।।३
शिल्पेषु वाणिज्यवृत्तौ च वित्तं पर्याप्तमेते विनिवेशयन्तः ।
प्रकाममर्थं समुपार्जयन्तो नेपथ्यमात्रं किल दर्शयन्ति ।।४
मुग्धाङ्गनापाङ्गमनोहराभिर्वाग्धोरणीभिर्मधुराभिरेते ।
प्रतारकाः कैतवशून्यनृणां कर्षन्ति चित्तेन समं च वित्तम् ।।५
तथापि लोकास्तु विमुक्तिकामा एतेषु विश्वासमहो विधाय ।
वित्तं प्रकामं ददतेऽविचार्य प्रलम्भकेभ्यः किमितोऽस्ति चित्रम् ?।।६

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्नानमिव द्विपस्य

येषां न वेदाध्ययनेऽधिकारो न कर्मकाण्डेऽप्यथवास्ति कश्चित्।
स्त्री–शूद्र–चण्डालविमुक्तिहेतोर्जागर्ति नित्यं भुवि रामनाम ।।१
सन्त्यज्य सन्ध्यामथ तर्पणं चेत् सुरार्च्चनं विप्रकुलानुजातः ।
विहाय वेदान् भजते तु रामं कर्तव्यहीनो लभते न मुक्तिम् ।।२
अतो द्विजः प्रत्यहमेव सन्ध्यामुपास्य कुर्यादपरं हि कर्म ।
शिवस्य विष्णोरथवाम्बिकाया विनायकस्यार्यमणः पूजां वा ।।३
शुष्केण वस्त्रेण भुवि प्रकुर्यादार्द्रेण चेत्पाथसि सम्प्रविश्य ।
पित्रादि तृप्तिं सलिलेन कृत्वा धीरो विदध्यादथ पञ्चयज्ञान् ।।४
पक्वान्धसा वाप्यथ तण्डुलेन स्याद्वाम्भसा वा पठनेन सम्यक् ।
फलं मनूनां समुदीरितं प्रागापत्सु विप्रस्य कृते मुनीन्द्रैः ।।५
निषिद्धकर्माणि विहाय कश्चिद्यदि स्मरेच्छ्रीरघुनन्दनं वै ।
तदा स रक्षेत्कृपया कृपालुर्न जातु दुष्कर्मसु सक्तचित्तम् ।।६
आसेवमानस्य सदा ह्यपथ्यं किं रोगिणः स्यात्फलमौषधेन ।
वृथार्थनाशान्मनसि प्रकामं खेदं ह्यवाप्नोति न संशयोऽत्र ।।७
यः कर्मचारी निजकृत्यहेतोश्छलेन वित्तं नयति प्रजाभ्यः ।
देवालयं पश्यति विग्रहं वा देवस्य किं तेन कृपां लभेत ?।।८
पराङ्मुखो यो निजकृत्यजाते धूर्तो वहिर्दर्शयते हि भक्तिम् ।
शक्नोत्यसौ वञ्चयितुं हि लोकान् कदापि नान्तःस्थमीशं कथञ्चित् ।।९
यस्यानुतापो न विधाय दोषं पुनः पुनस्तं कुरुतेऽतिवेलम् ।
जपेन मन्त्रस्य फलं न किञ्चित्सर्वं ध्रुवं स्नानमिव द्विपस्य ।।१०

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेनैव हानिर्महतीह लोके

सती भवेत्कापि सुरां पिवन्ती क्वचित्कदाचिज्जगतीह सत्यम् ।
शास्त्राण्यनालोच्य न कश्चिदेव ज्ञानी कथञ्चिद्धरणौ ध्रुवं स्यात् ।।१
षडङ्गवेदान् सरहस्यकल्पान् गुरोरधीत्यातिपरिश्रमेण ।
पत्न्या समेतो हि गृहस्थकृत्यं सम्पाद्य सन्न्यासमथाश्रयेज्ज्ञः ।।२
इष्टिं विधायामरतृप्तिहेतोः श्राद्धैश्च पितॄन्परितोष्य भक्त्या ।
विवेकवैराग्ययुतो जनो यः स एव योग्यो न्यसनाय सम्यक् ।।३
कृता न सन्ध्या न च तर्पणं वा वार्त्ता क्रतूनां समुदेति कस्मात् ?
सन्न्यासयोग्यः स कथं भवेद्वा न केवलं तत्र वयः प्रमाणम् ।।४
[1]वैधुर्य्यवार्द्धक्ययुताः समस्ताः सन्न्यासधर्मं विधिवद्विधातुम् ।
विना विरागं किमु शक्नुयुस्ते गृहेषु रागः प्रवलोऽस्ति येषाम् ।।५
पौत्रं सुतं वा निजभागिनेयं [2]भ्रात्रीयमानीय सुतात्मजं वा ।
बम्भ्रम्यमाणा ममतान्धकारे मठेषु नित्यं परिपालयन्ति ।।६
भोगाय केचित्त्वपरे प्रतिष्ठालाभाय वैराग्यविवेकहीनाः ।
आयान्ति सन्न्यासपथं युवानो विमोहितुं हा जनतां विमुग्धाम् ।।७
स्पृशेन्न नार्याः प्रतिमां कदाचित्पदापि भिक्षुर्यदि वाऽतिवृद्धः ।
हा सेवयन्ते ललनाभिरेते तनुं स्वकीयां प्रथिता महान्तः ।।८
आरुह्य मञ्चं प्रचुरं गृणन्तः काषायवस्त्रं परिधाय गाढम् ।
वेदान्तवाणीं रहसि प्रकामं शिष्यासमेतं रचयन्ति रासम् ।।९
सन्यासमार्गो नितरां प्रशस्तो मोक्षाय सत्यं प्रथितोऽस्ति शास्त्रे ।
परं तदर्थं हि जनैः सुयोग्यैः प्रयोजनं [3]जाल्मचयेन किं वा ?।।१०
नायान्ति विज्ञा गृहवद्धरागा आयान्ति चाज्ञा गृहवद्धरागाः ।
कीदृग् भवेत्तस्य वदोपकारस्तेनैव हानिर्महतीह लोके ।।११

१. वैधुर्यं= मृतदारता, २. भ्रात्रीयं= भ्रातुष्पुत्रं, ३. जाल्मचयेन= मूर्खगणेन।

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षमेत नान्यः

शमादिभिः षट्सुगुणैरुपेतः सर्वत्र यः पश्यति साम्यदृष्ट्या ।
लोके परं शिष्टमतं विधत्ते स वन्दनीयो नितरां महात्मा ।।१
अधीत्य शास्त्राण्यथवा विदित्वा गुरोर्मुखात्सर्वमिदं विभाति ।
ब्रह्मेति नैवास्त्यनुभूतिलेशः कथं विमूढो विजहाति कर्म ।।२
विद्वद्द्विजे हस्तिनि सारमेये समानदृष्टिः खलु पण्डितः स्यात् ।
गीतोक्तितात्पर्यमवुध्यमाना मुह्यन्ति केचित्कुधियो जगत्याम् ।।३
आचारसाम्यं नहि युज्यतेऽद्धा विचारदृष्ट्या यदि वा समानः ।
अस्यां जगत्यामिति सम्यगेव विचार्य कार्यः सुधिया हि भेदः ।।४
श्वानस्य मूल्येन न वारणेन्द्रो लभ्यः कथञ्चिदथवात्र कार्यम् ।
तुल्यं हि खाद्यं च रूपञ्च नैवेत्यवैति लोकः सकलः समन्तात् ।।५
''यतो वयं हीश्वरसृष्टदेहास्ततो ध्रुवं भ्रातर एव सर्वे ।
रक्तस्य रङ्गः सम एव, कस्माज्जातिप्रभेदः क्रियते मुधा भोः ।।६
इदं हि खाद्यं त्विदमेव कार्यं गम्येयमित्यादि यदस्ति शास्त्रम् ।
कृतं मनुष्यैर्न कदाचिदेवेश्वरेण सर्वं'' प्रवदन्ति मूढाः ।।७
उत्सृज्य शास्त्रीयविधिं समन्तात् प्रज्ञाविहीना बहुधा वदन्तः ।
सहात्मनान्यान्नरकस्य मार्गे मुधैव नूनं परिचालयन्ति ।।८
शास्त्रं परित्यज्य यदीह मूढः स्वैरं चरेत्कर्मचयं विमोहात् ।
सिद्धिं न सौख्यं परमं पदं वाप्नुयात्कदाचिन्निजगाद कृष्णः ।।९
श्रुत्या च युक्त्या परिचिन्त्य तस्माद्विविच्य सम्यक् सुचिरं सुधीरः ।
शमाद्युपेतो ह्यमृतत्ववाप्त्यै क्षमेत नान्यो विषयानुरक्तः ।।१०

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततोऽर्थये

अनन्तदोपा मयि सन्ति सत्यं गुणोऽस्ति वा नो तदहं न जाने ।
परं परेशः कृपया कृपालुः करोति सर्वं सुखमेव मह्यम् ॥१
न मादृशः कोऽपि भवेद्धि मन्दः समुद्धतः स्वार्थपरो जघन्यः ।
कथं विधत्ते करुणाकटाक्षं शक्नोमि वक्तुं नहि सत्यमेतत् ॥२
पित्रोः सुकृत्या गुरुसेवया वा जन्मान्तरीयं किमु पुण्यमस्ति ।
न वेद्मि किञ्चित्करुणां किमर्थं करोति मूढे स हि वेद देवः ॥३
न पूजयेऽहं विविधोपचारैर्न प्रत्यहं वापि जपामि मन्त्रम् ।
स्मराम्यजस्रं तमहं कथं वा मृषा वदेयं विषयेषु सक्तः ॥४
रसेषु सक्ता रसना मदीया माधुर्ययुक्तेषु तथा च कर्णौ ।
समुत्सुकौ सन्ततमेव शब्दान् श्रोतुं स्तुतिं स्वामनुकूलवाचम् ॥५
स्पर्शेषु त्वक् चापि तथेप्सितेषु रूपेषु कान्तेषु च नेत्रयुग्मम् ।
नासा सुगन्धेषु मनस्तु शश्वत् सङ्कल्पनैरिङ्गति यत्र तत्र ॥६
न पारयामि स्वमनो निरोद्धुं कृत्वापि यत्नं बहुभिः प्रकारैः ।
ततोऽर्थये तच्चरणारविन्दे कृपां विधत्तां मयि मन्दभाग्ये ॥७
रज्यन्तु मे नो करणानि जातु प्रपञ्चमध्ये च विभोः प्रसादात् ।
संरज्यतां सन्ततमेव चित्तं तत्पादपद्मे प्रविहाय सर्वम् ॥८

—*—

नारायणमाश्रये तम्

वितत्य दीर्घं स्वपतत्रयुग्मं, सुनिर्मले खे तरसा डयन्तम् ।
अध्यास्य नागान्तकमम्बुजाक्षः, स्मेराननो मे शरणं सदास्तु ॥१
प्रतप्तचामीकरतूल्यभासं रमां स्ववामे विनिवेशयन्तम् ।
घनाघनाभं धृतशार्ङ्गचापं, नारायणं तं शरणं प्रपद्ये ॥२
नवारुणाभं दधतं मनोज्ञं, मन्दानिलान्दोलितमुत्तरीयम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पलाशपट्टाम्वरबद्धमध्यं, पीतं वसानं वसनं भजेऽहम् ।।३
सुधाशनानां मुदमादधानं, रक्षोऽङ्गनागर्भनिपातशब्दम् ।
यः पाञ्चजन्यं शशिशुभ्रशङ्खं, सव्येन हस्तेन दधाति नीचैः ।।४
कौमोदकी या सततं प्रमोदं, देवाङ्गनानां नियतं विधत्ते ।
युद्धे निहत्यासुरसैन्यजातं, विराजते दक्षिणनीचहस्ते ।।५
सहस्रभानोरपि तीग्मतेजः, स्फुरत्प्रभामण्डलमादधानम् ।
सुदर्शनं यस्य करेऽपसव्ये, ऊर्ध्वे चकास्ति प्रणतार्तिहत्यै ।।६
विकाशनेनापि च चारुतायाः, सृष्टेः प्रतीकं कमलं सुदिव्यम् ।
वामोर्द्ध्वहस्ते प्रविभाति शश्वत्, यस्यैव नारायणमाश्रये तम् ।।७

—*—

विमोचय द्राक्

दुःखे सुखे वा मनसः स्थिरत्वं सदास्तु मे हे भवदुःखहारिन् ।
मा धान्मदस्तत्र पदं कदाचिद् दयस्व शश्वच्छरणागतेऽस्मिन् ।।१
कर्त्तासि हर्त्तासि भवस्य देव त्वया विनान्यो नहि कश्चिदस्ति ।
त्वन्मायया भ्रान्तधियः समस्ता मुधैव सज्जन्ति जना जगत्याम् ।।२
रम्येषु हर्म्येषु च कामिनीषु द्रव्येषु पुत्रेषु निबद्धचित्ताः ।
इमानि नित्यानि विभाव्य मूढा दुःखान्यजस्रं समवाप्नुवन्ति ।।३
यदि त्वदीया करुणा कदाचिज्जायेत कस्मिन्नपि दैवयोगात् ।
तेभ्यो विरज्याखिललोकबन्धो आनन्दकन्दे रमतेऽनिशं सः ।।४
नश्यत्वविद्या समुदेतु विद्या कृपाकटाक्षं मयि सन्निधेहि ।
संसारनिद्रा समुपैतु चान्तं न कामयेऽन्यत्त्वयि सर्वरूप ।।५
वन्दारु-वृन्दारक-वन्दितांघ्रे निबद्धमद्धा विषयेषु रागैः ।
सुदुर्जयैरायसशृङ्खलैर्मां विमोचय द्राक् करुणाकटाक्षैः ।।६

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भज भक्तबन्धुम्

मीनादयो ये प्रथितावतारा नारायणस्यैव भवन्ति सर्वे ।
तेऽंशस्वरूपा विबुधैरुपास्यो नित्यं ततोऽसावपरो न लोके ।।१
मूलस्य सेकेन भवेद्धि लाभो यथा कदाचिन्न तथा दलानाम् ।
लतातरूणां प्रवदन्ति सर्वे तस्मादुपास्यो भगवाननन्तः ।।२
रामोऽस्तु कृष्णोऽस्त्वथवानृसिंहस्त्वेतानि रूपाणि हि कार्यहेतोः ।
नारायणस्यैव ततो भजध्वं तमेव नित्यं विभुमद्वितीयम् ।।३
आपो हि नारा इति धर्मशास्त्रे पुरातिरम्यो मनुना कृतोऽर्थः ।
स्थानार्थकं चाप्ययनं प्रदिष्टं तेनैव नारायणनाम सिद्धम् ।।४
ज्ञानञ्च नारं प्रवदन्ति सन्तस्तेनायनं नाम भवेदवाप्तिः ।
यस्यैव देवस्य हि सम्प्रदिष्टो नारायणोऽसौ खिलसूरिमुख्यैः ।।५
भजस्व नारायणनाम नित्यं भुक्तिश्च मुक्तिश्च यतः सुखाप्या ।
नारायणान्नापर एव पाता त्रितापदावाद् भवकाननेऽस्मिन् ।।६
ग्राहाभिभूतो गजराट् पुरासौ सस्मार नारायणमेव भक्त्या ।
झटित्युपेत्यारिवरेण नक्रं प्रणाश्य तं रक्षितवान् दयालुः ।।७
क्व तेऽस्ति विष्णुर्वद दुर्विनीतेत्युक्त्वात्मनीनं तनयं जिघांसुम् ।
हिरण्यपूर्वं कशिपुं नृशंसं भूत्वावधीद्भक्तिवशः नृसिंहः ।।८
घनाघनाभं धृतशङ्खचक्रं पीताम्बरं स्मेरमुखं रमेशम् ।
दृष्ट्यैव दुःखं सकलं हरन्तं विहाय मूढो भजतेऽन्यदेवम् ।।९
ज्ञानं धनं वा विपुलं विशालं कुलं वयो रूपमथो सुजातिः ।
भक्त्या विना नेष्यत एव किञ्चित् लक्ष्मीधरेणाखिललोकमध्ये ।।१०
नारायणं कुण्डलशोभिगण्डं गलोल्लसत्कौस्तुभरत्नसारम् ।
शङ्खारिपद्मं गदया समेतं करैर्दधानं भज भक्तबन्धुम् ।।११

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न ततोऽस्ति कश्चित्

ममास्ति दोषः सुमहान् हि कश्चिन्मिथ्यावचः सोढुमहंक्षमो न ।
अन्यायरोधं सततं च कुर्वे यः कोऽप्यसौ स्यान्नहि तत्र चिन्ता ।।१
तेनैव दुःखं वहुधानुभूतं चाध्यक्षवर्गेण कृतं पुरा यत् ।
धर्मस्य लोके जय एव यस्मादभूत्ततो मे शुभदो ह्युदर्कः ।।२
प्राप्तानि दुःखानि च तैः परस्मिन् ज्ञातो न हेतुः परमेवकाले ।
अनुग्रहात्तस्य महाप्रभोर्वै विभेमि कस्मादपि जातु नाहम् ।।३
सदा सहायः स ममास्ति लोकेऽददाद्वरञ्चापि मनोऽनुरूपम् ।
'कर्तुं यथेच्छं त्वमिह क्षमः स्याः साफल्यमाप्नोतु तवाभिलाषः' ।।४
चिन्ता ततः कापि न वाधते मां स्थितौ हि कस्यामपि तत्कृपातः ।
तत्पादपद्मे मम चित्तभृङ्गः रंरम्यतां केवलमर्थयेऽहम् ।।५
माता पिता वा तनयाः कलत्रं मित्राणि वित्तानि गृहं शरीरम् ।
विद्या मतिश्चापि पराणि यानि तेनैव दत्तान्यखिलानि तानि ।।६
अनन्तनाम्नः स्मरणं जपो वा भवाब्धिसन्तारणकारणं स्यात् ।
ममेष्टदेवो न ततोऽस्ति कश्चिन्नारायणः सोऽपि सदाशिवश्च ।।७
केचिज्जगन्नाथ इतीरयन्ति प्राहुस्तमेके खलु विश्वनाथम् ।
कुमारमन्ये च परे च दुर्गां गणाधिपं सूर्यमपि व्रुवन्ति ।।८
रूपाणि नामानि च तस्य लोके शक्नोति को वर्णयितुं मनुष्यः ।
सुरासुरैर्यस्य महाप्रभावो न ज्ञायते तं प्रणमामि देवम् ।।९
रूपैरनेकैरपि नामभिश्च व्याप्नोति विश्वं स हि देव एकः ।
विना कृपां तस्य च तथ्यमेतद्वेत्तुं न शक्नोति जनो यथावत् ।।१०
भेदोऽस्त्युपाये च तथा ह्युपेये सर्वत्र लोके परिदृश्यतेऽद्धा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परं ममोभौ स हि देवदेवोऽभेदः सदा वर्तत एव तस्मिन् ।।११
इष्टस्य वाप्त्यै गुरुमाश्रयन्ते इष्टोऽभ्युपेयो गुरुरभ्युपायः ।
नायं नयः सङ्घटते मदीये क्षेत्रे परं किं करवाणि चित्रम् ।।१२
विना तमेवास्ति न कश्चिदत्र त्रातुं भवाब्धेर्हि विलोकयामि ।
कृपां तदीयामनिशं ततोऽहं सम्प्रार्थये तच्चरणारविन्दे ।।१३
कामादयो ये रिपवोऽन्तरस्थाः शरीरमाश्रित्य गदाः स्थिता वा ।
वाह्या च ये मां परिपीडयन्ति नश्यन्तु सर्वे तदनुग्रहेण ।।१४

—*—

तस्माद्व्रज साधुसङ्गम्

ज्ञानस्य जननी भक्तिर्भक्तिर्ज्ञानाय कल्पते ।
परम्परया भक्तिर्हि मोक्षस्य कारणं मतम् ।।१
ज्ञानान्मोक्षमवाप्नोति प्रत्यक्षं भवबन्धनात् ।
ज्ञानमेव भवेन्मोक्षोऽज्ञानं संसार इष्यते ।।२
वर्णज्ञानं विना ग्रन्थपाठो नैव भवेद्यथा ।
भक्तिं विना ज्ञानप्राप्तिः सम्भवेन्न तथैव हि ।।३
अनालोक्य तु ग्रन्थं चेत् वर्णाभ्यासरतः सदा ।
मूढो न ज्ञातुं प्रभवेद्ग्रन्थतात्पर्यमेव हि ।।४
भक्तिं यः कुरुते शश्वद्विचारं नैव जातुचित् ।
मोक्षो न सम्भवेत्तस्य विचारविमुखस्य हि ।
अतो भक्त्या समं कुर्युर्विचारं हि मुमुक्षवः ।।५
विचारेण विना ज्ञानं कार्यञ्च कारणं विना ।
प्रपञ्चे कुत्रचिन्नास्ति न भूतं न भविष्यति ।।६
ज्ञानेन हीनो भजतेऽन्यदेवान् भोगाय मोक्षाय च सुप्रसिद्धम् ।
ज्ञानी तु नित्यं निजबोधरूपे सुनिश्चितं तिष्ठति योगयुक्तः ।।७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानस्य वाप्तिस्तपसा च भक्त्या भवेत् ध्रुवं श्रीपरमेश्वरस्य ।
सच्छास्त्रसत्सङ्गवशाद्भवेतां त एव तस्माद्भज साधुसङ्गम् ।।८

१. ते+एव इति पदच्छेदः । ते ज्ञानस्य प्राप्तिः भक्तिश्च द्वयमेव सच्छास्त्रसत्सङ्गत्या वा भवत इत्यर्थः ।

—*—

मुक्तिः

यत्कर्म यस्यैव कृते प्रशस्तं शास्त्रेषु सम्यक् प्रतिपादितं प्राक्।
सम्पादनीयं सुविविच्य तद्वै फलाभिलाषं पुरतोऽपहाय ।।१
यो निष्ठया कर्मणि सम्प्रवृत्तो विना फलाशां लभते स सिद्धिम् ।
निष्ठाविहीनो हि फलाभिलापी नाप्नोति तां हा परमेव दुःखम् ।।२
शास्त्रोक्तकर्माण्यपहाय यो वै भक्तिं बहिर्दर्शयितुं यतेत ।
नासौ सुखं स्वर्गमथापवर्गं लभेत किञ्चिद्ध्रुवमेव लोके ।।३
भक्त्या समं कौलिककर्मजातं कुर्वञ्जनो मोदत एव शश्वत् ।
इहाप्यमुत्राप्यपवर्गमाशु प्राप्नोति विष्णुः स्वयमादिदेश ।।४
यावान् सुयोगो मिलतीह लोके कुर्याद्यथाशक्ति हि शास्त्रकर्म ।
सोऽतः कदाचिन्नहि पण्डितेन हेयं कथञ्चिद्विहितं यदस्ति ।।५
विना न कर्माणि भवेद्धि भक्तिर्विना च तां ज्ञानकथा कथं स्यात् ।
विना च तां नैव कदापि मोक्षः सिद्ध्येत्कथञ्चिच्छ्रुतिसार एषः ।।६
वदन्ति केचिन्नहि मुक्तिरिष्टा भक्तिस्तु काम्येति परं विचार्यम् ।
मुक्तेः स्वरूपं नहि ते विदन्तो भ्रान्त्या प्रजल्पन्त्यविशुद्धसत्त्वाः ।।७
अर्थेषु सर्वेषु विवेकपूर्वं द्वेषं च रागं प्रविहाय सम्यक् ।
आप्तिः स्वरूपस्य भवेद्धि मुक्तिर्द्रव्यस्वरूपा नहि सा कदाचित् ।।८

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वमस्यहम्

त्वमस्यहं चाप्यहमस्मि वै त्वं भेदोऽस्ति नैवात्र मनागपीति ।
वदन्ति वेदाः विविधैः प्रकारैस्तथापि हा नो समुदेति बोधः ॥१
अबुध्यमानाः श्रुतिबोधसारं मायाप्रभावात्स्वयमेव मूढाः ।
अस्मिन् प्रपञ्चे वत सज्जयन्तीतरानपि भ्रान्तधियो मुधा हा ॥२
नानेव यः पश्यति लोकमध्ये मृत्योः स मृत्युं समुपैति मूढः ।
एकं हि तत्त्वं विततं समन्तान्नान्यद्द्वितीयं किमपीह तस्मात् ॥३
सुस्पष्टमन्यत्किमितो भवेद्वा शक्नोति जाल्मो न तथापि बोद्धुम् ।
ध्रुवं पुरा दुष्कृतमेव हेतुर्नोदेति बोधोऽप्यसकृच्छ्रुतेऽपि ॥४
अंशांशिभावं प्रवदन्ति केचिद् यथार्थतोऽसौ न भवेत्कदाचित् ।
उपाधिना कल्पित एष भावो घटान्मठाद्वा वियतो भिदावत् ॥५
अंशांशिभावो नियतं यदि स्यादनित्यता नैव निवारणीया ।
भवेद्ध्रुवा तेन विचार्य सम्यक् स्वीकार्यमार्येण यथाहि चोक्तम् ॥६
यो जीवभावो गदितोऽस्ति शास्त्रे क्वचित्क्वचिल्लौकिकदृष्टितो हि ।
बुधैर्नबोध्यः परमार्थतोऽसौ श्रुतेर्विरोधात्प्रसमीक्ष्य नित्यम् ॥७
भयं द्वितीयाद्भवतीति वाक्यं चष्टे श्रुतिस्तत्सुविविच्य धीरः ।
ब्रह्माहमस्मीति दृढं स्वचित्ते निश्चित्य नित्यं लभते प्रमोदम् ॥८

—*—

गङ्गामभिलक्ष्य

गङ्गे शङ्करमूर्द्धनि प्रविलसद्भङ्गे सदा मङ्गले
सङ्गेनात्मजलस्य ते मलजलं लोके भवेन्निर्मलम् ।
बुद्ध्येत्थं परिभावयन्ति नियतं ये त्वां जगत्पावनीं
क्षिप्त्वावस्करसञ्चयं निरयभाजस्ते ध्रुवं पापिनः ॥१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मघ्नाश्च भवन्ति ये च मनुजा गुर्वङ्गनागामिनः
स्वर्णस्तेयकृतश्च ये वदनजाः[१] सुरां पिवन्तो मुदा ।
सम्पृक्ता इह ये भवन्ति च पुनस्तैरेव दुर्वृत्तिभि-
स्तांस्तांस्तारयितुं त्वमेव जननि क्ष्मामागता ह्यञ्जसा ।।२
त्वत्तीरे परिहाय वित्तमतुलं पुत्रांश्च दारांश्च ये
रम्यं हर्म्यचयं तथा च सुहृदो मोक्षाभिलाषा जनाः ।
पीत्वा ते विमलं जलं प्रमुदिता ध्यायन्ति देवं हरिं
नायन्ते वसुधां पयोधररसं मातुर्हि पातुं पुनः ।।३

१. वदनजाः = ब्राह्मणाः ।

—*—

भूयादिदं संस्कृतवर्द्धने*

विरिञ्चिसृष्टे निखिले प्रपञ्चे राज्ञी रुचं काञ्चिदियं दधाना ।
समञ्चितत्वाद्विबुधैरनेकैः स्पर्द्धेत चेद्द्यां नहि तत्र चित्रम् ।।१
[१]वनेश्वराख्यो विवुधाग्रगण्यो [२]वनेश्वरः किं गुणरत्नराशिः ।
[३]वनेष्वरं सङ्घटनं विधाया[४]वनेश्वरो योऽमरवाच एव ।।२
विभिन्नदेशेभ्य इयं समागतैः सभा विभातीह महीतलेऽधुना ।
सुपर्ववाचा सुमनोभिरञ्चिता यथा सुधर्मा विबुधैः सुपूरिता ।।३
गीर्वाणवाणीप्रणयात्समागता माहेश्वरी गानकलाविशारदा ।
वसन्तपुष्पाभरणैर्विभूषिता साक्षात्किमेषा गिरिराजकन्यका ।।४
यः सत्यनारायणनामधेयः शर्मण्यवासी बुधवृन्दवन्द्यः ।
सम्मेलनाध्यक्ष इहास्ति योग्यः सञ्चालिता तेन सभाति साधु ।।५
विचारकाणां प्रमुखो विहारे मान्यो मनीषी वनवारिलालः ।
मुख्यातिथित्वेन विराजमानोऽस्तावीद्भृशं संस्कृतवाचमुच्चैः ।।६
काश्मीरलालश्च विनोदशर्मा बुधाविमौ स्वागतकर्मदक्षौ ।
कायेन वाचा मनसा हि ताभ्यां सन्तर्पिताः प्राघुणिकाः समस्ताः ।।७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुधाधिकं यन्मधुरं सुरोचकं पर्याप्तमन्नं परिवेशितं सदा ।
प्रत्तानि हर्म्याणि च वासहेतवे समस्तसौविध्ययुतानि तत्त्वतः ।।८
बुधैरिहत्यैर्विहितं सुशोभनं सम्मेलनं सर्वगुणैः समन्वितम् ।
भूयादिदं संस्कृतवर्द्धनेऽधुना क्षमं समस्ते खलु भारतेऽनिशम् ।।९

* झारखण्डस्य राञ्चयाम् अखिलभारतसंस्कृतसम्मेलनमभिलक्ष्य रचिताः श्लोकाः १९९५ तमे वर्षे । १. रा.प. सम्मानितः वनेश्वरपाठकः, २. वनस्य = जलस्य ईश्वरः वरुणः, ३. वनेषु =वनाञ्चलेषु, ४. अरं= शीघ्रं, ५. अवने = रक्षणे, ६. ईश्वरः = प्रभुः ।

—*—

संस्कृताः सन्तु सर्वथा

दीनानाथजनधात्री जय संस्कृतभारति ।
उपकृतास्त्वया प्रायस्त्वामेव विस्मरन्ति हा ।।१
ताडितो दैन्यतोत्रेण त्वामेवाश्रयते जनः ।
उपकृतो वत्सलया त्वया प्रस्मरतीह धिक् ।।२
केचिद्यद्यपि वाञ्छन्ति तवोपकृतये जनाः ।
प्रातिकूल्यात्कालस्यैते सफला प्रभवन्ति नो ।।३
अर्थाजनस्य पन्थानः प्रशस्ता न यतस्त्वया ।
विहिता सर्वकारेण विमुखी जनता ततः ।।४
बाल्येऽधीत्य श्रमेण त्वां निःशुक्लमथ यौवने ।
न लभन्तेऽर्थप्राचुर्यं प्राप्नुवन्ति यथापरे ।।५
कृषिशिल्पादिशास्त्राणामभावस्त्वयि लक्ष्यते ।
पूर्वमासंस्तु ये ग्रन्थाः कालेन ते प्रणाशिताः ।।६
विरलाः प्रतिभावन्तः पठन्ति त्वां हि सम्प्रति ।
विषयांस्तान्समाश्रित्य ग्रन्थान् को रचयिष्यति ? ।।७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतिष्ठाप्रेप्सवः केचिन्म्लेच्छीमाङ्ग्लीमुपासते ।
अर्जयन्तस्त्वया वृत्तिं चित्रा कालगतिर्ध्रुवम् ।।८
गृहद्वारि 'वेल्कमि'ति म्लेच्छलिप्या हि लिख्यते ।
न 'स्वागतं' 'नमस्ते' वा क्वापि कुड्ये प्रदृश्यते ।।९
त्वया विरचितान्ग्रन्थान् पत्रिका न क्रीणन्ति ते ।
परं प्रभूतवित्तैस्तु विभिन्नपुस्तकान् शठाः ।।१०
भाषन्ते ते सभास्वेव 'संस्कृतिः संस्कृताश्रिता' ।
परमाचरणे तेषां वैपरीत्यं हि दृश्यते ।।११
वसनं सोत्तरीयञ्च कञ्चुकं वसते न ते ।
प्याण्टं, साटं च वसते पाश्चात्यरीतिचोदिताः ।।१२
उत्तरीयस्थले भाति गलवन्धनकर्पटम् ।
उष्णीषस्थाने 'क्याप्' एव तेषां मस्तकभूषणम् ।।१३
मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यत्प्रदृश्यते ।
एतदालोक्य नश्चेतः खिद्यते भृशमेव हि ।।१४
तिष्ठन्मूत्रकता प्रोक्ता यत्पशोर्लक्षणं बुधैः ।
साधुना दृश्यते हन्त तवाध्येतृषु सर्वथा ।।१५
कं वा किं वा ब्रूमो मातर्देहि तेभ्यः शुभां मतिम् ।
सम्यगधीत्य सर्वे त्वां संस्कृताः सन्तु सर्वथा ।।१६

—*—

एतामविष्यति यदि प्रभुविश्वनाथः

या संस्कृतिं बहुपुरातनकालतो वै पुष्णाति भारतभुवो विविधैर्विभावैः ।
सा भारती कथमुपेक्षत एव तस्मादुद्धर्तुमिच्छत समे विबुधा युवानः ।।१
उच्चारणेन सह संवदतीति सत्यं वैज्ञानिको वदति संस्कृतवर्णमाला ।
नैतादृशी जगति काचिदपीह भाषा स्पर्द्धेत शब्दविभवेन च धातुभिर्या ।।२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदैश्च दर्शनगणैरपि धर्मशास्त्रैः काव्यैश्च नाटकचयैरितिहासयुक्तैः ।
या वैद्यकैश्च कृषिसङ्गीतयुद्धशास्त्रैः सम्पूरिता सुरगवीव हि काम्यदात्री ।।३
भूपैर्द्विजैश्च सततं खलु पूज्यमाना वैदेशिकाक्रमणतः कृशतामुपेता ।
पङ्केऽर्जुनीव पतिताद्य तु सीदतीयं कालः करोति सकलं वलवान् स एव ।।४
अर्थार्जनस्य न यतोऽस्ति सृतिः प्रशस्ता नो संस्कृतं पठति कोऽपि धनाढ्यपुत्रः ।
हीना धनेन च धियाध्ययनार्थमेत्य श्राम्यन्ति नात्र सुदृढं न ततोऽस्ति लाभः ।।५
अध्यापने च लपने यदि देशभाषा स्यान्माध्यमं न सुरगीः किमितोऽस्ति लज्जा ।
विद्यालयेषु विपुलं धनमाप्नुवन्तो नो चिन्तयन्त्यपि लवं विषयेऽत्र विज्ञाः ।।६
ये सन्त्यपि प्रचुरमर्थमुपार्जयन्तोऽधीत्यैव संस्कृतमहो नहि तेऽपि पुत्रान् ।
विद्यालये सुरगिरो वत पाठयन्ते ते वा कथं परसुतान् पठितुं वदेयुः ।।७
कृत्वा श्रमं प्रचुरमेव हि वाल्यकाले दिष्ट्या जनो यदि धनं विपुलं ह्यलब्ध ।
वित्तार्जनाय नहि येन प्रशस्तमार्गाः सम्पाठयेत्सुरगिरं स कथं सुतान् स्वान् ।।८
संस्थापिता हि बहवः खलु विश्वपूर्वा विद्यालया विपुलवित्तनिवेशनेन ।
सर्वं वृथा नहि यतोऽप्युपयोगलेशः क्वापीह संस्कृतगिरः कथयाम कं किम् ।।९
कार्यं हि कार्यभवने वत संस्कृतस्य भाषान्तरैर्भवति चेन्न तु संस्कृतेन ।
नास्त्यादरो निजगृहेऽपि जनस्य यस्य प्राप्नोत्वसौ कथमहो वहिरेव तं भोः ।।१०
नाख्यात-कारक-समास-लकार-सन्धीन् जानाति यो कथमहो स तु शास्त्रवेत्ता ।
कश्चिद्यदीह लभते नहि सुप्रवेशं वाण्यां कथं विषयबोधमवाप्नुयात्सः ।।११
नो प्रौढता सुरगवि प्रविभाति यस्मादाच्छादयन्ति निजदुर्वलतां छलेन ।
प्रौढिं दिदर्शयिषवः प्रवदन्त आंग्लीं मन्यन्त आत्मन इमे खलु धन्यधन्यान् ।।१२
आटोपदर्शनफलं नहि किंचिदस्ति श्राम्यन्तु तेन सकलाः सुरवाक्सुभक्ताः ।
अध्यापने च पठने निकृतिं न कृत्वा गाढश्रमो भवति हि परिणामरम्यः ।।१३
पाश्चात्यरीतिरधिकेति मतिर्हि येषां भाषा च संस्कृतिरहो नहि भारतीया ।
रोचेत तेभ्य इति चेत्किमिहास्ति चित्रं हा हा त एव खलु संस्कृतकर्णधाराः ।।१४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हा संस्कृतस्य विषये किमिहास्ति वाच्यं सर्वे रुदन्ति नहि चक्षुपि लोतलेशः।
कस्यापि दृश्यत इह ध्रुवसत्यमेतदेतामविष्यति यदि प्रभुविश्वनाथः ।।१५

—*—

सम्बोधयामि किमिति

सम्बोधयामि किमिति प्रथमं न जाने प्राणेश वा प्रियतम प्रभवेद्धि युक्तम् ।
विज्ञानमस्ति विषयो न कलामधीये क्षम्या त्वयास्मि विहितो विनयाञ्जलिस्ते।।१
नद्यास्तटेऽतिनिकटे तव रूपमादौ दृष्ट्वा कथं मम मनस्त्वयि लीनमासीत् ।
हृन्मन्दिरे त्वमसि भोस्तत एव नित्यं किं तन्त्रमन्त्रनिपुणेन कृतं त्वयाङ्ग[१] ।।२
चन्द्रोपमं सुवदनं नयने विशाले श्मश्रुव्रजोऽतिरुचिरोन्नतनासिकाधः ।
मध्ये विकाशिकमलं मधुपावलिर्वा संदृश्यतेऽत्र परितः किमहं करिष्ये ।।३
रूपं तवातिमधुरं हृदयं कथं वा ? स्यात्कोमलं ध्रुवमये परितर्कयामि ।
हे निर्दय स्मरसि किं त्वयि वद्धभावां मां जातु सूचय जवं न विलम्बयाङ्ग।।४
भूयः कदा तव सुधाकरविम्वतुल्यं कुत्राननं मम दृशो र्विषयो भवेत्किम् ?
पत्रं लिखाशु कृपयानुनयो मदीयो नो निर्दयो भव मम प्रणतिं गृहाण ।।५

१. अङ्ग= 'आगो' इत्युत्कलभापायां सम्वोधनमिदम् ।

—*—

रज्याम्यहं त्वयि *(I Love you)*

रज्याम्यहं त्वयि सखि ध्रुवमेव भाषेश्रद्धत्स्व मे वचसि चारुचमूरु[१]नेत्रे ।
त्वद्दर्शनेन हृदये मम कोऽपि भावो जातोऽस्ति वक्तुमभिलष्य न पारयामि।।१
मोदे त्वया भृशमये मदिरेक्षणेऽहं मन्येऽल्पमेव समयं यदि वा ह्यनल्पम् ।
त्वञ्चाहमत्र निखिले भुवनेऽजनेऽस्मिन् रंस्यावहे वत इहानिशमेव वाले ।।२
त्वञ्चेन्ममान्तिक इहाखिलमेव दुःखं क्ष्वेडं[२] पिवेयममृतोपममेव सत्यम् ।
का बालका समधिका किमु नन्दनं वा सामीप्यमस्तु तव सन्ततमायताक्षि।।३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

³मोनालिसास्मितसुधा किमु मेनकाया नेत्रान्तवीक्षणमुताप्सरसां सुलास्यम् ।
रम्भागतिर्धृतिहरा स्वरमाधुरी सा स्याद्वा घृताच्यखिलमोहकरी ततः किम्।।४
त्वामन्तरेण भुवनत्रितयेऽपि सत्यं नान्यां वराङ्गि गणयामि समा त्वया या ।
उक्त्येक्षणेन गमनेन मनोहरन्ती निर्वृतये⁴ मम भवेत्सुचिरं सुकेशि ।।५

१. चमूरुः= मृगः, २. क्ष्वेडं= विषम्, ३. स्मितमुख्या मोनालिसायाः चित्रं विश्वप्रसिद्धम्, ४. निर्वृतये= सुखाय ।

—*—

नर्मठालापः

पुरुषः – ईक्षणेन तव सुन्दरि श्रमो नाहमन्यतरुणीं हि कामये ।
स्त्री–ईक्षितोऽसि मम दासशङ्कया याहि षण्ड न रतिर्मम त्वयि ।।१
पु–नर्मणेदमुदितं मया प्रिये (स्त्री)–प्रत्ययो न मम तेऽस्ति भाषणे ।
पु–ब्रूहि केन मयि ते रतिर्भवेत् (स्त्री)स्वस्य दोषमवगच्छ नागर ।।२
पु– विश्वसीहि मयि चारुलोचने (स्त्री)– विश्वसेन्न वत कापि जातुचित्।
पु– सुभ्रु कास्ति जगतीह ते तुला (स्त्री)– प्रीणयस्व तव तां मनोहराम्।।३
पु– त्वां विना न मम चित्तहारिणी (स्त्री)सत्यमेतदिति संशयो महान्।
पु– एहि याव चलचित्रमन्दिरं (स्त्री) त्वर्यतां तदिह नो विलम्ब्यताम्।।४
उभौ– प्रीतिरस्ति यदि गाढमन्तरे सर्वदेह भुवि भाग्यशालिनौ ।
दम्पतीति कथयन्ति पण्डिताः आवयोः सततमस्तु सा हृदि ।।५

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुर्वृत्त-वृत्तम्

दुर्वृत्तवृन्दैः परिपूरितेयं पुरी प्रयातीह परां प्रतिष्ठाम् ।
वासाय कश्चिद् यदि नूतनोऽत्र समेति तं हा परिपीडयन्ति ।।१
प्रसह्य तस्माद्द्रविणं ग्रहीतुं प्रदर्श्य शस्त्रं वत भीषयन्ति ।
अश्राव्यशब्दान् परिकीर्त्तयन्तः स्वपौरुषन्ते समुदीरयन्ति ।।२
स्थातुं तवेच्छास्ति सुखेन चेद्द्वोः सहस्रसंख्यं गुणितं दिशाभिः।
प्रयच्छ वित्तं कुरु मा विलम्बं नैवान्यथा ते स्थितिरत्र स्याद्वै ।।३
आरक्षिपार्श्वे गमनेन लाभो भवेन्न कश्चिद्द्वयमेव शक्ताः ।
ते नः श्वशुर्याः[१] न दरोऽस्ति तेभ्यः कारास्मदीया च विलासभूमिः ।।४
अस्त्यत्र वाक्कीलगणोऽस्मदीयः कारागृहान्मोचयितुं समर्थः ।
हन्तॄन् विधायापि च प्रातिभाव्यं चिन्तास्ति काचिन्न मनाक्तदर्थम् ।।५
यद्धूसराभं मदकृत्सुचूर्णं या वारुणी सा नहि तत्तुला स्यात् ।
तदेव सेव्यं खलु लक्ष्यसिद्धयै समेहि सर्वैर्यदि रोचते ते ।।६
या मल्लविद्याभ्यसनाय शाला 'जागाघरं' तत्परिकीर्त्यतेऽत्र ।
सदस्यतामाप्नुहि तस्य शीघ्रं मोदस्व गन्धोत्तमया[२] युवत्या ।।७
व्रतोपवासैः शरीरं विशोष्य चरन्ति धर्मन्तु दिवे सुमूढाः ।
कोऽर्थोऽस्ति पत्न्या कथयात्मजैर्वा कादम्बरीसेवनमेव नाकः ।।८
मृत्योः परं नारकनाकवार्त्ताः कुर्वन्ति धूर्त्ताः परिवञ्चनाय ।
इहैव नाको नरकश्च लोके न पञ्चतानन्तरमस्ति किञ्चित् ।।९
विधायकोऽस्माकमिहास्ति नेता करिष्यते को वद कां क्षतिं नः।
अलं विलम्बेन धनं प्रयच्छ पश्यासिपुत्रीं यदि जीवितेच्छा ।।१०
नवागतः किं कुरुतां वराको ददाति तेभ्यो द्रविणं विभीय ।
निर्माणकार्यस्य च वस्तुजातं तथापि मुष्णन्ति परोक्षमेते ।।११

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदेव तीर्थं प्रवदन्ति लोका यत्रास्ति साक्षाज्जगतामधीशः ।
पुष्पेषु कीटा इव दुष्टभावा दुर्वृत्तसङ्घाश्च वसन्ति तत्र ।।१२

१. श्वशुर्याः = शालकाः, २. गन्धोत्तमया= मद्ये न ।

—*—

पं. चतुर्भुजरथवाटीवर्णनम्

विविधकुसुमराज्या राजितं नन्दनाभं
पनस-कदल-विल्वैः पादपैः पूरितञ्च ।
विहगकलनिनादैः कर्णपीयूषतुल्यै-
रखिलजनमनांस्याकर्षति स्थानमेतत् ।।१
त्वक्सारशोभाञ्जनचूतरम्भाविल्वाङ्घ्रिपैर्भाति भृशं मनोज्ञम् ।
मल्लीवधूल्यादिसुमेषु सक्ता गुञ्जन्ति भृङ्गा मधुरं समन्तात् ।।२
लतालवालेषु जलं ददाना बुधात्मजाः सन्ति भृशं प्रसन्नाः ।
सौन्दर्यमेताः फलपुष्पवत्याः सम्मार्ज्य वाट्याः परिवर्द्धयन्ते ।।३
दुष्टेन दैवेन निरम्बकेभ्यः[१] प्रदाय नेत्रं विमलं हि बोधम् ।
उत्कर्षवाप्त्यै यतते तु तेषां चतुर्भुजाख्यो हि महान्विपश्चित् ।।४
साध्वी मनोज्ञा प्रियभाषिणी च पत्नी तदीया गृहकर्मदक्षा ।
संशोभमानः स तया मनीषी दक्षः स्वकृत्ये निवसत्यजस्रम् ।।५

१. निरम्बकेभ्यः= अन्धेभ्यः

(भुवनेश्वरदृष्टिहीनविद्यालये दि. ३०.५.९७) ।

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लिप्सा

गीर्वाणवाणी जननी मदीया तयास्मि पूतः परिपोषितश्च ।
तत्सेवया मे जननं व्यतीयात् सम्प्रार्थये श्रीजगदीशितारम् ।।१
दुग्धं गुडो वा मधु शर्करा वा द्राक्षाथवा चेदपरा हि भाषा ।
वाणी सुधेयं विबुधैरुपास्या नास्यास्तुला स्यादपरा कदाचित् ।।२
गोदावरी वा यमुना शतद्रुः कृष्णाथवा स्यादपरा हि भाषा ।
मन्दाकिनीयं त्रिदिवस्रवन्ती नास्याः समा स्यादितराञ्जसैव ।।३
मल्ली सरोजं तगरी सुमं वा भवेद्यदि भाषितमन्यदेव ।
कल्पप्रसूनं खलु संस्कृतं स्यादनेन तुल्यं नहि किञ्चिदस्ति ।।४
छागी मृगी वा महिषी खरी वा कौलेयकी वा भुवि शूकरी वा ।
भाषा भवेच्चेदपरेह लोके गीर्वाणवाणी खलु कामधेनुः ।।५
नारायणो वाथ विशाखदत्तः भासो मुरारिर्भवभूतिरन्ये ।
श्रीकालिदासप्रमुखाः कवीन्द्राः ख्यातिं प्रयाताः खलु नाटकैस्ते ।।६
भट्टिः कविर्भारविमाघभोजाः श्रीहर्षमार्कण्ड*मयूरमुख्याः ।
भव्यानि काव्यानि विधाय लोके चिराय याताः स्मरणीयतां ते ।।७
धर्मार्थकामैः सह मोक्षमार्गो मन्वादिभिर्देवगुरुप्रमुखैः ।
वात्स्यायनाद्यैः श्रुतिभिश्च साक्षात् यत्रोपदिष्टस्त्वतिविस्तरेण ।।८
न केवलं त्वैहिकसौख्यमात्रं पारत्रिकं या परिदर्शयन्ती ।
ब्रूहि तुलास्यादपरात्र वन्धो भाषा कथञ्चित्समयत्रयेऽपि ।।९
ज्ञानं धनं वा सुतमित्रदारास्तस्याः प्रसादात्सकलं मदीयम् ।
आनृण्यमाप्तुं सकलं समर्प्य क्षमः कथं स्यामिति चिन्तयामि ।।१०
जन्मात्र लोके यदि मे पुनः स्याद् भूयात्तदा भारतवर्षमध्ये ।
द्विजन्मवंशेऽमरवाचमेतामधीत्य लप्सीय सुखं प्रकामम् ।।११

—*—

३१.०८.९७ बलाङ्गिरे

* उत्कलीयेन मार्कण्डमिश्रेण विरचितं दशग्रीववधमहाकाव्यम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विना

पुण्यं विना किं सुखमाप्यते क्वचित् पापं विना वा [१]भवते सुखं जनः ?
धूमो विनाग्निं यदि दृश्यते क्षितौ बोधो विना नैव विचारणां ध्रुवम् ।।१
पुष्पं विना स्यात्प्रसवो यदि क्वचित् बीजं विना वा यदि शस्यसम्भवः ।
क्षुधानिवृत्तिश्च विनान्नभोजनं विना जलं स्यात्प्रशमः क्वचित्तृषः ।।२
विना निदानं यदि कार्यसम्भवो भक्तिं विना स्याद्यदि दर्शनं विभोः ।
विना गुरुं नैव च बोधसम्भवो विना न बोधं खलु मोक्ष आप्यते ।।३
क्रियां विना स्याद्यदि कर्त्तृता क्वचित् विनोपवासं यदि सम्भवेत्तपः ।
विनौदनः स्याद् यदि तण्डुलं क्षितौ शिवानुकम्पां न विना विमोक्षणम् ।।४
विना व्यवायं नहि गर्भसम्भवो विना क्लमं नैव च मातृता यथा ।
विना श्रमं नैव च शास्त्रवैदुषी विना सुतं स्यान्न गृहाश्रमे सुखम् ।।५

१. भवते = लभते भू आप्तौ (सारस्वते) ।

—*—

शुभाशंसा*

प्रमोदचन्द्रप्रतिभाप्रकर्षो न हर्षयेत्कं सुरवाक्सुभक्तम् ।
आदर्शभूतं सुचिराय नूनं स्तुत्यं तदीयं खलु कार्यजातम् ।।१
या स्रग्धरा तस्य मनःप्रसूता सुतेव यत्नेन हि लाल्यते सा ।
भूयाच्चिरायुर्धरणौ कृशाङ्गी कृपावशाच्छ्रीभुवनेश्वरस्य ।।२
विभूषितेयं कृशगात्रयष्टिर्भाषात्रयेणापि लिपित्रयेण ।
नाना विधैर्या विषयैरुपेताखिलान् बुधान्मोदयतेतरां वै ।।३

(पुरीस्थश्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य आचार्येण (प्रफेसरेण) श्रीप्रमोदचन्द्रमिश्रेण प्रकाशितां मासिकीं 'स्रग्धरा'ख्यां पत्रिकामभिलक्ष्य लिखिता काशीतः ।)*

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कामयते जनोऽयम्

राष्ट्रस्य पत्युर्नधनं न मानं प्राप्तं तदर्थं न ममास्ति चिन्ता ।
चेखिद्यते सन्ततमेव चेतो ब्राह्मया: सपर्या न कृतानुरूपा ।।१
न्यायादिशास्त्रेषु कृत: श्रमो नो सौविध्यलेशो न मयाप्यवापि ।
दारिद्र्यदु:खेन समं पितामेऽकाले भवत्प्राघुणिको यमस्य ।।२
न सन्निधौ कोप्यभवद्विपश्चिन्न्यायं यतोऽध्येतुमहं ह्यशक्ष्यम् ।
अधीत्य किञ्चित्परिपोषणाय कुटुम्बवर्गस्य कृते प्रविष्ट: ।।३
अध्यापने कर्मणि किं विदध्यां न सर्वथा मेऽनुकूलं हि भाग्यम्।
तथाप्यनन्तस्य कृपावशाद्धि स्नेहाशिषा श्रीगुरुमण्डलस्य ।।४
सामान्यतो व्युत्पत्तिरत्र सत्यं गीर्वाणवाण्यां मम काचिदस्ति ।
सिषेविषा मे तत एव जाता तस्या यथाशक्ति यतेऽल्पबुद्धि: ।।५

(सन्दानितकम्)

आयुर्धनं सौख्यमथोत विद्या दैवेन निर्द्धारितमेव यावत् ।
लभेत तावद्धि जन: पृथिव्यां दु:खं तदर्थं नहि जातु कार्यम् ।।६
पुण्यादृते नो सुलभं यश: स्याद् यशस्विनो ये खलु पुण्यवन्त: ।
नोप्त्वा क आशां कुरुतेऽत्र मूढो वप्रे[1] प्रकामं वद शस्यराशिम् ।।७
यथा तथा मे जीवनं व्यतीतं सुखेन दु:खेन च मिश्रितं सत् ।
कालोऽवशिष्ट: परमेश्वरस्य प्रयात्वजस्रं परिचिन्तनेन ।। ८
भूयान्न हानिर्मयका कदाचित्कस्यापि काचिद् यदि सम्भवेद्वा ।
अस्तूपकारो वपुषा गिरा वा धनेन वा कामयते जनोऽयम् ।।९

१. वप्रे = केदारे ।

—*—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रचकपरिचयः

श्रीलक्ष्मीधरद्विवेदी, साहित्य-धर्मशास्त्र-पुराणाचार्य-वेदान्तशास्त्री १८६४ तम शकाब्दीय-तुला-षष्ठदिवसे (ता. २२.१०.१९४२) जगत्सिंहपुरान्तर्गत-रेढुआप्रेपालयान्तर्भुक्त-गह्मापुरग्रामे लब्धजन्मा । अस्य पितरौ श्रीमन्तौ केलुणीदेवी-कुलमणिद्विवेदिनौ । अयं पितुः प्राथमिकसंस्कृत-शिक्षां प्रापत् । पण्डितश्रीरामचन्द्रदाश-काव्य-व्याकरण-स्मृतितीर्थ-पण्डितश्रीकृष्णचन्द्रपाणि-साहित्यसांख्ययोगाचार्य-पण्डितश्रीकुलमणिमिश्र-धर्मशास्त्र-साहित्याचार्य-वेदशास्त्रिपण्डितश्रीभजकृष्णमिश्र-वेदान्तवागीश-काव्यतीर्थादिभ्यः प्राप्तप्रतिष्ठेभ्यो गुरुभ्यो व्याकरण-साहित्य-धर्मशास्त्र-वेदान्तादिशास्त्राण्यधैष्ट। बहुषु परीक्षासु लब्धप्रथमश्रेणीकः । संस्कृतभाषणस्पर्द्धायां द्विर्लब्धस्वर्णपदकः । प्रणवपारिजात-सुधर्मा-शारदा-सूर्योदयादिपत्रिकासु प्रकाशितानेकलेखः । वलाङ्गीरस्थसंस्कृतपरिषदः संघट्टकश्चायं विविधोच्चविद्यालयेषु प्रायो द्वादशवर्षाणि वलाङ्गिरस्थविद्याभूषण-संस्कृतमहाविद्यालये षड्विंशतिं वर्षाणि चाध्याप्य सेवानिवृत्तः सन्न्यासाश्रमे सम्प्रति तत्त्वबोधतीर्थनाम्ना पुरीस्थित ब्रह्मधाम्नि अवस्थाय वेदान्तचिन्तनं करोति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीलक्ष्मीधरद्विवेदिना रचितानि प्रकाशितानि च पुस्तकानि

१. संस्कृतं हि भारतस्य राष्ट्रभाषा
२. कविताावितानम्
३. दशग्रीववधः (१म सर्गः) - बालबोधिनीटीका
४. बालबोधः (प्रथमसंस्कृतशिक्षार्थिनां कृते नितरामुपयोगी)
५. सङ्गीतकलिका (ओडिआ)
६. समलेश्वरी भजनमला (ओडिआ)
७. श्रीकृष्णस्तोत्रम्
८. शारलास्तोत्रम् (उत्कललिपिमयम्)
९. विमलानन्दोपनिषद्
१०. जगन्नाथस्तुतिमञ्जरी (उत्कललिपिमयी)
११. शिवभजनमाला (ओडिआ)
१२. स्तवस्तवकम्
१३. कवितामञ्जरी

—०—



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नायमात्मा बलहीनेन लभ्यो
न च प्रमादात्तपसो वाप्यलिङ्गात् ।
एतैरुपायैर्यतते यस्तु विद्वां-
स्तस्यैष आत्मा विशते ब्रह्मधाम ।।

(मुण्डक ३/२/४)

दुर्बल व्यक्ति इस आत्माको नहीं लाभ कर सकता है। अनवधानतासे वा लिङ्ग (सन्यास) विहीन तपस्यासे भी नहीं। जो विद्वान् इन उपायोंसे प्रयत्न करता है, उसका आत्मा ब्रह्मधाम में प्रवेश करता है ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri